
Vol. V

No. 1



BULLETIN OF THE GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY MADRAS

EDITED BY

T. CHANDRASEKHARAN, M.A., L.T.

Curator, Government Oriental Manuscripts Library, Madras

PRINTED BY THE SUPERINTENDENT
GOVERNMENT PRESS
MADRAS
1952

TABLE OF CONTENTS

ANYOKTIMĀLĀ
OF
ĀCCĀN DĪKṢITA

Edited by
T. CHANDRASEKHARAN, M.A., L.T.,
Curator, Government Oriental Manuscripts Library, Madras.

This poem, Anyoktimālā, is composed in the form of an Anthology. It is divided into two Āśvāsas, containing verses in different metres.

The author of this work is one Āccān Dīkṣita. He says in his work, that he belongs to the family of the great Appayya Dikṣita. It is not known whether this author is identical with the famous Āccān Dīkṣita, younger brother of Appayya Dīkṣita and the grandfather of the illustrious Nīlakaṇṭha Dīkṣita. If this identity is correct then it is not known why it is mentioned in the colophon that he belongs to the family of Sri Dīkṣita instead of mentioning that he is brother.

The Author belongs to a village called Gopālasamudram (Āśvāsa II, verse 103). If this Āccān Dikṣita is identified as the brother of Appaya Dīkṣita, then this village is the same that exists in Rājamannārguḍi, in the Tanjore District, the birthplace of Mahāmahopādhyāya Rāju Śāstrigal. If, however, he is only a descendant of Nīlakaṇṭha Dikṣita, the grandson of Āccān Dīkṣita, then a doubt may arise, whether this is the same village in the Tanjore district or a village with the same name in the Tirunelveli district. Since there was no descendant of Appayya Dīkṣita in the Tirunelveli district, prior to Nīlakaṇṭha Dīksita, who, after retirement from the services of the Nāyak kings, settled at Pālamaḍai, in the Tirunelveli district.

This edition is based upon a single paper manuscript of this library bearing D. No. 11995.

॥ श्रीः ॥

॥ अप्पय्यदीक्षितवंशजेन श्रीमदाच्चान्दीक्षितकविना प्रणीता

अन्योक्तिमाला ॥

---

१. । चन्द्रान्योक्तयः ।

अस्तु स्वस्ति सुधाकराय जगदानन्दैकजीवातवे
स्वालोकेन सुधामुचा कुवलये विस्तारयित्रे श्रियम् ।
दूरापास्तकलङ्कया स्वकलया सर्वज्ञचूडापद-
श्लाघावैभवभाजनाय सुमनस्त्राणैकतानात्मने ॥ १ ॥

पाथोधेः पितुरेव तं स परमो वेदानगृह्णात्पुमान्
चन्द्र, त्वं च कलानिधिर्जगति ते सूनुर्बुधो विश्रुतः ।
त्रय्यात्मेति रवेः प्रशस्तिरुदभूत्प्रायस्त्वदासङ्गिनो
भूयस्त्वं समतीत्य वाङ्मनसयोः पन्थानमुद्द्योतसे
॥ २ ॥

रत्नानां निलयः पिता तव शिशोः सर्वज्ञमूर्ध्नि स्थितिः
प्राप्ता सप्तभिरष्टभिश्च दिवसैः कृत्स्नाः कलाः
प्रीणिताः ।
अङ्गानां प्रतिपादनेन विबुधाः जैवातृकान्यच्च यद्
भावत्कं हरिणाङ्कितं च हृदयं तेनासि लोकोत्तरः
॥ ३ ॥

सद्गोष्ठीरसिकं कलानिधिममुं सर्वज्ञचूडामणिं
दृष्ट्वा नन्दितुमक्षमी स चपलो मेघो न्यरौत्सीन्मुधा ।
किं तेन स्युतमस्य यत्सपदि तं व्याधूय रोधं हठाद्
दीप्यत्येष यथापुरं कुवलयग्रामैकभाग्यं हि तत्
॥ ४ ॥

राजासौ द्विजसंसदां कुवलयप्रेम्णामसौ भाजनं
हन्तासौ तमसां सतां पतिरसौ स्वामी कलानामसौ
अस्त्येवेदमशेषमत्र विशयो नास्माकमीषच्च त-
न्नालं तस्य तथाविधस्य यदयं चक्रं समास्कन्दति
॥ ५ ॥

२. । रत्नाकरान्योक्तयः ।

यो रक्षत्यखिलं जगत्स परमो यत्रैव शेते पुमान्
ये धिन्वन्ति जगन्ति वारिभिरमी यत्रायतन्ते घनाः ।
येनापह्नुवते जरां सुमनसस्तच्चास्ति यत्रामृतं
जीयात्सोऽयमपास्तविघ्नमखिलक्षेमाय रत्नाकरः
॥ ६ ॥

मह्यं श्रीरिति शार्ङ्गभृत् त्रिदशराट् चिन्तामणिर्मह्यमि-
त्यब्जो मह्यमितीश्वरः सुरगणो मह्यं स्थिरः
सन्त्विति ।
सर्वे सन्ति गृहीतुमेव जलधेः सर्वस्वमेनं रुषा
हन्ताचामति तापसो न गदितुं कोऽप्यस्ति
तन्मास्त्विति ॥ ७ ॥

का ते सिंधुपते मतिर्यदि मनो लोकाय दातुं पयः
स्वल्पं वा बहु वा स्वयं वितर तन्मध्ये
किमम्भोमुचा ।
यो ज्ञात्वा नवनीपकाम्युदयकृन्निम्नं नवाप्युन्नतं
यश्चावैति तमेव हन्त जगतां दानाधिकारे न्यधाः
॥ ८ ॥

३. । कौस्तुभान्योक्तयः ।

प्रायस्त्वद्गुरवोऽपि सन्ति मणयो (गन्धा) [गाधा] न
काप्यस्ति तैः
यत्सत्यं मणिराज भाग्यमखिलं त्वन्मूलमेवोदधेः ।
श्रीमांस्त्वं समभूर्यदा तदनु खल्वस्योदभूवन्निमा
दिव्यानामपि रामणीयक(भृ)[हृ]तस्वान्ताः गजान्ताः
श्रियः ॥ ९ ॥

दत्वा जीवनमात्मनोऽपि जगतीमुत्पुष्णतो वारिधे-
रुत्पत्तिरतव शाखिनोऽपि सहजाः पुष्यन्ति कामान्
बहून् ।
सैव श्रीः सहजा समस्तभुवनक्षेमाय या कल्पते
(तं द्रक्ष्यस्यत एव) [तादृक्षस्य तवैव] कौस्तुभ कुतः
काठिन्यमासीदियत् ॥ १० ॥

। मेघान्योक्तयः ।

कालोऽयं शिवतातिरेव भवतु प्रस्थानमद्यैव ते
त्वामन्वेति समीरणो धुरि शिखिद्वन्द्वं दरीदृश्यते ।
तद्दृक्ष्यस्युदधिं स्वजीवनपदं त्वामादरिष्यत्यसौ
मुञ्चन् काञ्चन वृष्टिमाशु समये स्फारं यशश्चेष्यसि
॥ ११ ॥

पौरस्त्यः पवनो न वाति न तटिल्लेखा समुज्जृम्भते
नोदेति स्तनितार्भटी न कुहचिद् भेकोऽपिशब्दायते ।
पश्यागत्य कुतोऽपि कश्चन घनस्सन्तापसर्वंकषै-
रासारैर्जगतामनन्यसुलभं क्रीणाति सर्वं यशः

लोके नैव घना गता घनकथा प्रागेव सृष्टेः कथं
तत्प्रागेव ममापि जीवनकथेत्यन्तश्शुचा चातकः ।
यावत्त्यक्तुमसून्व्यवस्यति हठात् तत्प्राणनाडिन्धमा-
नासारान हरिदङ्गणेषु विकिरन् ध्यामुज्जिहीते
घनः ॥ १३ ॥

शुद्धाम्भोनिधि(सा)[मा]सृजत् कमलभूर्दिष्ट्येति किं मोदसे
सृष्टेनापि किमस्ति कस्य मनसामप्यङ्ग दूरे सता ।
भूयो ब्रूहि घनानिमान्यदि न ते कल्याणिनः पक्षपाः
शुद्धाम्भोनिधिरित्यमुष्य भुवने नामापि जानीत कः
॥ १४ ॥

प्रागेवाहमदां किमेष पुनरप्यागादिदानीमिति
त्वं चेत् किञ्चिदुपेक्षसे घन तृषा नूने निजे
चातके ।
कस्यायं सविधे चलिष्यति मुखं प्रेक्षिष्यते कस्य वा
वारं वारमुदीर्य किं तव कृपा यद्यस्ति जीवेत्सुखम्
॥ १५ ॥

धन्वानः करिकुम्भदघ्नपयसः प्रेङ्खत्तरङ्गोद्भटाः
वेशान्ता रभसावपातितटस्थायिद्रुमाश्चापगाः ।
त्वय्यम्भोद समागते न समभूत् किं वा कथं चातकः
त्वत्प्राप्योदरपूरमम्बु वलते वातापकृष्टः क्वचित्
॥ १६ ॥

पाथोदस्समयं प्रतीक्ष्य पयसां राशेर्मुषित्वा पयः
सद्यश्शाखिषु भूधरान्तिकगतेष्वाकीर्य कांश्चित्कणान् ।
[ता](ना)नादाय निबद्धपल्लवपुटानाक्रम्य विष्णोः पदं
कुर्वन् विश्वमराजकं कुवलये शोच्यां विधत्ते दशाम्
॥ १७ ॥

। हंसान्योक्तयः ।

धन्वैन्द्रं परिगृह्य दिक्षु विकिरन्नासारमत्युल्बणं
नन्वत्रैव समेति हन्त जलदः पापी किमित्यास्महे ।
इत्यातङ्कविवर्णवक्त्रमुदयद्बाष्पाम्बुरुद्धेक्षणं
चञ्चूत्स्रस्तसरोजकेसरमनामन्त्र्यैव हंसा ययुः
॥ १८ ॥

उन्नाले नलिने तरङ्गतरले हंसः प्रियाभिस्समं
हृष्यत् प्राक् सुखमास्त यो रसभृतां शृण्वन्नलीनां गिरः ।
अद्यासौ घनवैशसेन नलिने नष्टे गतासु प्रियास्-
स्वेकाकी नलिनीलतानिगलितो नक्तंदिवं ताम्यति
॥ १९ ॥

प्रेयान् पद्मरजःकषायिततनुः पाथोजिनीर्निर्विशन्
निश्चिन्तं कमलाकरे विहरतीत्युत्प्रक्षेते हंसिका ।
नेदं वेद यदेष सन्ततपतत्सम्पातमग्नाम्बुजे
कासारे बिसलेशमप्यकलयन्नुद्वाष्पमुद्भ्राम्यति
॥ २० ॥

6 । समीरणान्योक्तिः ।

श्लिष्टानामितरेतरं प्रवयसामापाद्य भूमीरुहां
सङ्घर्षं तदुदञ्चितेन विपिनं ये दन्दहत्यग्निना ।
चण्डास्ते मरुतोऽधुना कति कति क्षोणौ न किं तैरसा-
वेकश्चन्दनशीतलो ननु जगत्प्राणः परं दुर्लभः
॥ २१ ॥

। मेघान्योक्तयः ।

सम्यक् चण्डकरं निरुध्य परितोऽप्यावर्ष्य दावानलं
निर्वाप्य क्षितिमाकुलय्य फलिनीमिश्वास्य च प्राणिनः ।
अस्थानावसरे घन प्रवयसां द्वेषेण शुद्धात्मनां
प्राप्य श्रीपरिहाणमेत्य लघुतामप्येवमाघूर्णसे ॥ २२ ॥

गानं तत् क शिखण्डिनां विलसितं विद्युल्लतानां क तद्
गम्भीरं स्तनितं कु तत् क तदपां विश्राणनं चातके
हा धिङ् मां किममुष्य रोदिमि धन क्षीणोऽसि कस्मादहो
दिष्ट्यास्मार्षमिदं दशा समुद् त् प्रावृड्वियोगेन ते
॥ २३ ॥

४ । सूर्यान्योक्तयः ।

त्वामायान्तमुदीक्ष्य राजसरणौ भास्व(न्मुखी [न्रुची] नां पदं
लोके तत्तदिव प्रसूनमिदमप्यम्भोजमुन्मीलति ।
एतेनैव मिथो निबध्य समयं (प)[व]श्योक्तयः केऽप्यमी
पद्मिन्याः प्रणयस्त्वयीति कियदुद्वेलं समाचक्षते
॥ २४ ॥

त्वं मुद्रामवधीर्य राजविहितां कोशे निधत्से करं
नोन्मेषं सहसे सतां कुवलयग्रामस्वमास्कन्दासि ।
जीर्येत्किं तव (म)[त]त्सहेत न यमो हा विस्मृतं सोऽपि ते
सूनुश्चेत् सवितस्सहेत स कथं राहुस्तवोद्वाग्गिनम्
॥ २५ ॥

आशङ्कयैव तवोदयं कुवलयं सातङ्कमास्तेऽन्वहं
द्वौ पुत्रौ तव तत्र कश्चन पदा स्वज्ञः कियच्चेष्टनः ।
यच्चान्यः कुरुते हठादसु(हत)[हृतिं]तत्रासते साक्षिणः
किं व्याहृत्य सहस्रमद्य भवतः स्रष्ट्रे विधात्रे नमः
॥ २६ ॥

५ । मधुव्रतान्योक्तिः ।

औत्सुक्येन चिरान्मधुव्रतयु[वा] श्लिष्यन्दृढं पद्मिनीं
घ्रायंघ्रायमुदारगन्धललितं स्मेरं तदम्भोरुहम् ।
यावन्नन्दति तावदेव निपतत्यागत्य गन्धद्विपो
तामाध्याय स निश्वसन्नपययौ दीना चकम्पे च सा
२७ ॥

। गजान्योक्तिः ।

प्राशस्त्यैकनिकेतने समुद्भूस्त्वं सार्वभैमान्वये
त्वामञ्चन्ति महाकुलक्षितिभृतस्सर्वेऽप्यमी मौलिभिः ।
दानानामसि जन्मसद्म च करिंस्ताठस्थ्यमप्यम्ति चे-
दीषत्ते विमलं द्विजैः निलया जीवेदियं पद्मिनी
॥ २८ ॥

१० । पद्मिन्यन्योक्तयः ।

नाथे दूरगते तवाब्जिनि हठाद्लुण्ठनापि श्रियं-
दिष्टया चन्द्रमसा निशीथसमये नालुण्ठि यत्
कण्ठिका ।
तन्मन्ये दयितस्तवेति कुशली चन्द्रेऽपि तस्मिंस्थिते
संमुद्रचोत्पलिनीश्च तत्प्रणयिनीस्त्वां तच्छ्रिया
योक्ष्यति ॥ २९ ॥

आवाल्याद्विव स श्रिया सह रुचां नेता सरागं करे-
णालम्ब्याम्बरमाहिताभिसरणः स्वैरं परिक्रीडते ।
भाग्येऽस्मिन् न किमाप्यवैति नलिनी कान्तस्य तस्या इति
प्रायो मीलितलोचनं कथयता को वा विधत्तां
मुखम् (?) ॥ ३० ॥

। बकान्योक्तयः ।

पक्षौ नोत्पतनक्षमौ कियदपि स्थातुं पदं दुर्बलं
चञ्चुर्विस्फुटिताचला प्रशिथिला ग्रीवा विकीर्णा गरः ।
इन्द्रम्यन्ति धिया त्वया बक तव प्राणाश्च हन्तैवम-
प्यद्रोहं कमलाकरे विहरतो मीनान्मुदा बाधसे

। व्याधान्योक्तयः ।

सत्यं केसरिणस्त्वया नियमितास्सत्यं गृहीता गजाः
सत्यं पञ्जरिताश्शरैः(लभनः)[शललिनः] सर्वं किलेदं पुरा ।
शृङ्गादद्य गिरेर्निपत्य चरणे भग्ने गता एव ताः
गाथा व्याध निरन्तरं निगदतो जिह्वैव ते श्राम्यति ॥ ३२ ॥

। सिंहान्योक्तयः ।

जानन्नप्यविदन्निव द्विपरिपो शेषे निकुञ्जान्तरे
काले विक्रमतस्तवाद्य तरसा निर्गच्छ गर्जन् बहिः ।
द्रागारोह गिरीन्द्रसानु करिणो निर्भिन्धि गन्धोद्यता-
नेषां मौलिजुषो विनिक्षिप दिशां कर्णेषु मुक्तामणीन् ॥ ३३ ॥

सिंहा मे मृगराजतेति कुहचिच्चेत्तो भवान् केसरिन्
तन्मत्वेतरथा गजाधिपतयः क्रीतं वनं मन्वते ।
तत्तूर्णं बहिरेहि सानुनि गिरेः स्थित्वानुशाधि क्षणं
नो चेदेतदिहैव वा प्रतिवसन्नुच्चैः कुरुष्वाभटीम् ॥ ३४ ॥

नास्माभिश्चरितुं तृणं न सलिलं पातुं न च स्थातुम-
प्यावासः समयाचि सिंह स भवानेवं कुतस्ताम्यति ।
राजा नस्त्वमसीति केवलमिहायाताः समालोकितुं
नैतच्चेदपि संभृतं वयमितो याता सुखं स्थीयताम् ॥ ३५ ॥

कातर्यैकपदं मृगाः शललिनः प्रागेव शल्याङ्किताः
मार्जारेष्विव मे नखानपचितुं संमन्वते वीचिषु ।
वोढुं मृद्गरमेव शिक्षितधियः प्रायो दिशां कुञ्जराः
तन्निर्लक्ष्यमिद बलं मम मुधेत्यातप्यते केसरी

वीथी सैव गजेन्द्र यत्र सर(सी)[सि]त्वं सोऽपि
विघ्नाधि(पा)[पो]
विघ्नांस्त्वन्मुख एव हन्ति निखिलं मन्मं त्वदीये पदे ।
उत्कर्षो बलिनां स एव भवदौपम्यं यदस्तीषद-
प्यास्ताद्दक् च विलोक्य सिंहशिशुकं स्वप्ने कियन्मुह्यसि ।
॥ ३७ ॥

। महिषान्योक्तयः ।

कूटस्थं भवतां कृतान्तसदने निद्राति भोः कासुराः
जानीमो निपुणं च तत्किमियता युष्मद्विभीमो वयम् ।
आटोपैरलमेभिराशु शकटीराकर्षतेदं न चेत्
संप्रत्येव सुखा(धि)[सि]का कुलगुरोरर्म्यर्ण एवास्तु वः
॥ ३८ ॥

सङ्घीभूय चतुष्पथे प्रतिदिनं सायं मु(दा)[धा] कासराः
किं व्यादाय मुखानि पश्यत मुहुः साध्वीमिमां
शृङ्गिणीम्
अत्रैषानुगुणे निधाय हृदयं युष्मान् पुरोव(क्ति)[र्ति]नः
क्रीडायापि न मन्यते सहृदयस्तस्यारस एको वृषः
॥ ३९ ॥

। गरुडान्योक्तयः ।

सत्पक्षाश्रयतामुपैषि न कदाप्यत्येषि मार्गं सतां
न स्वप्नेऽपि शृणोषि जिह्मककथां व्याप्नोषि
सर्वागमान्
आधात्से विनताशये च कुतुकं किं वा बहु ब्रूमहे
त्वं वामोऽपि वपुष्मतां प्रथयसे भद्रं द्विजातीश्वर

। पाटलान्योक्तिः ।

विश्रान्तो मधुरस्तु मन्दपवनो मा वातु मा कोकिलः
स्निग्धं जल्पतु मा च षट्पदयुवा सोल्लासमुद्गायतु ।
सर्वं यातु किमद्य तेन चतुरं जागर्ति चेत्पाटलं
घर्मेणापकृतं किमेष विजयी स्यादेव पुष्पायुधः ॥ ४१ ॥

। रसालान्योक्तिः ।

के यूयं मलयानिला वयमिमे के यूयमिन्दिन्दिराः
के यूयं च पिकाः क्व याम मिलिताः कस्यापि
यामोऽन्तिकम् ।
किं प्रच्छाद्य रसालशाखिन इति ब्रूहि प्रसन्ने मधा
व(स्मै)[स्मिन्]प्रैक्षिषि वोऽखिलान्न शिशिरे त्वालक्षयं
ऽत्रन ॥ ४२ ॥

। माधवान्योक्तिः ।

पुष्पाणामयमाकरो यदि यदि श्रयानृतूनामसौ
यद्येष प्रसवायुधस्य सचिवः को नाम नेत्याह तत् ।
मास्त्वन्यत्किमपीति जातिममलामन्विच्छतां केवलं
किं तेनाजनि माधवोऽयमिति चेत् कामं जयन्तां
द्विजाः ॥ ४३ ॥

। रसालान्योक्तिः ।

वल्ली व्याहरतो द्विजाननुदिनं धिन्वन् कलैः स्वादुभि-
र्विश्रान्तिं समवाप यस्त्रिजगति ख्यातो रसालो महान् ।
दिष्ट्या सांप्रतमङ्कुराः कतिपये मूलादमुष्योद्गताः
निर्व्याजं स इवाचरान्ति यदमी भाग्यं द्विजानामिदम्
॥ ४४ ॥

। मेघान्योक्तिः ।

सम्यक् चण्डकं[रं] निरुध्य परितोऽप्यावर्ष्य दावानलं
निर्वाप्य क्षितिमाकलय्य फलिनीमाश्वस्य च प्राणिनः ।
उत्कर्षावसरे घन प्रवयसां द्वेषेणं शुद्धात्मनां
नन्वेवं (त्व)[त्वम]भूर्वृथैव शर(धि)[दि]न्य स्तोऽपवादो जनैः ॥ ४९ ॥

किं त्वं गर्जसि वारिवाह परुषं पाथो न (नथा)[नाथा] महे
तद्विश्राणय सिञ्च (यं)[मां]यदि दया नो चेद्वृथा वर्तसे ।
घर्मेणाध्वनि पीडिता इति तव च्छायां तु याचामहे
नैतच्चेदपि संमतं जय चिरं सन्त्येव न शाखिनः ॥ ४६ ॥

। रसालान्योक्तिः ।

फलपर्यय वा मा वा सहकारतरो स एष कलकण्ठः ।
स्कन्धे तवैव निवसन् पञ्चमरागेण रञ्जयञ्जयति ॥ ४ ॥

अहोरात्रं कूजन् किमिति गलशोषं त्वमयसे
तव प्राप्यं भाव्यं परभृतक किंचित् किसलयम् ।
परीक्षापूर्वं किं वितरति रसालः फलमयं
पिकः काकः पान्थः कपिरपि च सर्वेऽपि सदृशाः ॥ ४८ ॥

। चकोरान्योक्तिः ।

वृथा कुतो नर्तसि चातक त्वं न कालमेघोऽयमितो मदान्धः :
स त्वादृशे(ऽन्यो)[भ्यो]न ददाति किञ्चिन् मातङ्गदानं मधुपेभ्य एव ॥ ४९ ॥

। सहकारान्योक्तिः ।

पल्लवितः कोरकितः फलितस्सहकारपादपस्सोऽयम् ।
कलकण्ठैरलिषण्डैः शोभनतुण्डैः शुकः परिष्क्रियते ॥ ५० ॥

। खद्योतान्योक्तिः ।

भानावस्तमिते शशिन्यनुदिते दीपेष्वनारोपिते-
ष्वाक्रान्तेषु दिगन्तरेषु तिमिरैरन्धीकृते विष्टपे ।
धाटीवल्गनघूर्णनप्रपतनप्रोन्मीलनोन्मीलनैः
दिष्टचा दुष्टजनस्य(बाह्य)[भाग्य]कणवत् खद्योत
विद्योतसे ॥ ९१ ॥

। कोकिलान्योक्तिः ।

ध्यायन्नञ्जननीरबुद्बुदपुटप्रायं स्वकं मस्तकं
प(ण्या)[श्य]न्नायसकूटकोटिघटितत्रोटीपुटं वायसम् ।
न स्थातुं न पलायितुं न चलितुं नोन्मीलितुं मीलितुं
नो मर्तुं न च जीवितुं प्रभवति त्रासाकु(लं)[लः]
कोकिलः ॥ ९२ ॥

। जम्बीरान्योक्तिः ।

कान्तिश्चेत्कनकाचलप्रतिनिधिः कान्ताकुचस्पर्धि ते
सौभाग्यं क्षितिपालदर्शनविधौ त्वं पूर्वसंदर्शकः ।
सौरभ्यं सकलातिशायि भवतो जम्बीर किं ब्रूमहे
कर्पूरप्रतिकूलता तव न चेत्त्वय्येव सर्वे गुणाः
॥ ९३ ॥

। भ्रमरान्योक्तिः ।

मागा वि(पा)[षा]दमलिपोतक केतकीना-
मन्तर्निलीनिमनवाप्य मधुप्रकर्षम् ।
लाभः स एव भवतः खलु कण्टकानां
श्रेणीभिरक्षतशरीरतया प्रयासि ॥ ९४ ॥

। कासरान्योक्तिः ।

रे रे कासर कातरोऽसि शकटानाकृष्य लाम्यस्यलं
स्वैरं दन्तिघटां प्रविश्य सपदि (ग्रा)[ग्रा]सान् सुखं
भक्षय ।
शुण्डा नास्ति रदाविति कदाप्येतां मतिं मा कृथाः
त्वं मत्तद्विरदोऽसि तावदिह कः पश्येदिदानीन्तनः
॥ ९५ ॥

। पनसान्योक्तिः ।

उन्मत्तकण्टकिफलप्रतियोगिबुद्ध्या वैरं वृथैव कुरु मा पनसेन सार्धम् ।
सन्तो हसन्ति न भजन्ति भजन्ति चेत्त्वां भ्रान्ता भवन्ति सहसेति जगत्प्रवादः ॥ ५६ ॥

। उन्मत्तान्योक्तिः ।

उन्मत्त धूर्त कितवेन्दुविलासयोग्ये स्थाने पिशाचपतिनापि(शि)[नि]वेशितोऽसि ।
किं कैरवाणि विकसन्ति तमः प्रयाति किं वाब्धिरुल्लसति किं दृषदः स्रवन्ति ॥ ५७ ॥

। सामान्यान्योक्तिः ।

निमीलयतु लोचने न हि तिरस्कृतो भास्करः
श्रवस्स्थगयतु स्वयं परभृतः किमु ध्वाङ्क्षानि ।
स्वयं भ्रमतु बालिशो न खलु बम्भ्रमीति क्षितिः
कदर्थयतु मुष्टिभिः कथय किं नभः क्षुभ्यति ॥ ५८ ॥

अण्डजाः पुण्डरीकेषु समुद्रेषु जनार्दनाः ।
नीलकण्ठाश्च शैलेषु निवसन्तु न ते न ते ॥ ५९ ॥

। पद्माकरान्योक्तिः ।

सन्त्यन्यानि सरांसि नक्रमकराक्रान्तानि किं तावता
भोः पद्माकर साम्प्रतं सुमनसामेकस्त्वमालम्बनम् ।
भृङ्गैरेव यशःसमार्जितमथाप्यायातमद्य स्वयं
बालं तं कलहंसमा(द्रि)[दृ]तवते भूयस्समग्रं यशः ॥ ६० ॥

। चातकान्योक्तिः ।

के वा न सन्ति भुवि वारिरुहावतंस-
हंसाव(नी)[ली]वलयिनो जलसन्निवेशाः ।
किं चातकः फलमवेक्ष्य सवज्रपातां
पौरन्दरीं कलयते नववारिधाराम् ॥ ६१ ॥

। मृगमदान्योक्तिः ।

मृगमद मा कुरु गर्वं परिमलमात्रेण तत्त्वमुपैषि। ।
परिमलता शीतलता सुकुमारता च कर्पूरे ॥ ६२ ॥

। मण्डूकान्योक्तिः ।

छादितदिनकरकिरणे धीरं धाराधरे दिवि ध्वनति ।
पल्वलपङ्कनिमग्नः प्रतिगर्जति हन्त मण्डूकः ॥ ६३

। मधुपान्योक्तिः ।

पद्मिनीं गुणवतीमपि हित्वा पुष्पिणीं गुणवतीमुपभुङ्क्ते ।
पक्षपातचटुलो भ्रमरोऽसावस्ति कुत्र मधुपेषु विवेकः ॥ ६४ ॥

प्रारम्भे कुसुमाकरस्य परितो यस्योल्लसन्मञ्जरी-
पुञ्जे मञ्जुलगुञ्जितानि रचयन् (ता)[ना]नातनोरुत्सवान् ।
तस्मिन्नद्य रसालशाखिनि दशां दैवात्कृपामश्नति
त्वं चेन्मुञ्चसि चञ्चरीक विनयं नीचस्त्वदन्योऽस्ति कः ॥ ६५॥

। वकुलान्योक्तिः ।

निसर्गादारामे तरुकुलसमारोपसुकृती
कृती मालाकारो वकुलमपि कुत्रापि निदधे ।
इदं को जानीते यदयमिह कोणान्तरगतो
जगज्जालं कर्ता कुसुमभरसौरभ्यभरितम् ॥ ६६ ॥

यस्मिन् खेलति सर्वतः परिचलत्कल्लोलकोलाहलैः
मन्थाद्रिभ्रमणभ्रमं हृदि हरिद्दन्तावलाः पेदिरे ।
सोऽयं तुङ्गतिमिङ्गिलाङ्गकबलीकारक्रियाकोविदः
क्रोडे क्रीड(तु)[ति]किं कुलीरकलहत्यक्तार्णवो राघवः (?)॥६७॥

लवङ्गान्योक्तिः ।

लूनं मत्तमतङ्गजैः कियदपि च्छिन्नं तुषाराम्बुभिः
क्लिष्टं ग्रीष्मजभीष्मभानुकिरणैर्भस्मीकृतं काननम् ।
एषा कोणगता मुहुः परिमलैरामोदयन्ती दिशो
हा कष्टं ललिता लवङ्गलतिका दावाग्निना दह्यते ॥ ६८ ॥

। मर्कटान्योक्तिः ।

हारं वक्षसि केनापि दत्तमज्ञेन मर्कटः ।
लेढि जिघ्रति संक्षिप्य करोत्युन्नतमासनम् ॥ ६९ ॥

। मेघान्योक्तिः ।

स्वार्थं धनानि धनिकात् प्रतिगृह्णतो य-
दास्यं भजेन्मलिनतां किमिदं विचित्रम् ।
गृह्णन् परार्थमपि [वारिनिधेर्ययदम्बु]
मेघोऽयमेति सकलोऽपि च कालिमानम् ॥ ७० ॥

नापेक्षा न च दाक्षिण्यं न प्रीतिर्न च संगतिः ।
तथाऽपि हरते तापं लोकानामुन्नतो घनः ॥ ७१ ॥

। सीतान्योक्तिः ।

वनान्तैः खेलन्ती शशकशिशुमालोक्य चकिता
भुजप्रान्तं भर्तुः सपदि भयहर्तुर्भजति या
अहो सेयं सीता दशवदननीता हलरदैः
परीता रक्षोभिः श्रयति विवशा कामपि दशाम् ॥ ७२ ॥

। सिंहान्योक्तिः ।

येनोदग्रनखाग्र(मानित)[दारित]महामातङ्गकुम्भान्तरो-
न्मीलन्मौक्तिकतारकाभिरटवीभूमिः समस्तीर्यत ।
दुर्दैवेन स पञ्ज(ने)[रे] निपतितो जालान्तरालासक्त-
त्क्रीडत्पाणित(ले)[लै]र्बलान्मृगपतिर्बालैः पराभूयते ॥ ७३ ॥

ईशान्योक्तयः ।

ईशः करस्वीकृतकाञ्चनाद्रिः कुबेरमित्रं रजताचलस्थः ।
तथापि भिक्षाटनमस्य जातं विधौ शिरस्थे कुटिले कुतः
श्रीः ॥ ७४ ॥

उक्षा रथो भूषणमस्थिमाला भस्माङ्गरागो गजचर्म वासः ।
एकालयस्थेऽपि धनाधिराजे सख्युर्दशेयं त्रिपुरान्तकस्य ॥ ७५ ॥

। वृक्षान्योक्तिः ।

चैत्रे द्वित्रिदिनानि पत्रनिकरं मुञ्चेदयं चेत्तरुः
प्राचीनं क्षतिरस्य का पुनरसौ सान्द्रोल्लसत्पल्लवः ।
सद्यश्चत्सुमनःप्रपञ्चविगलद्धूलीमधूलीमिल-
ल्लोलम्बालिरलं फलाय न किमु स्वालम्बिनां
प्राणिनाम् ॥ ७६ ॥

। पद्मान्योक्तिः ।

समुत्पत्तिः स्वच्छे सरसि हरिहस्ते निवसनं
विलासः पद्माया हृदयमपहारी परिमलः ।
गुणैरेतैरन्यैरपि च ललितस्याम्बुज तव
द्विजोत्तंसे हंसे यदि नतिरतीवोन्नतिरियम् ॥ ७७ ॥

क्षीरार्णवान्योक्तिः ।

साकं ग्रावगणैर्लुठन्ति मणयो बालार्कबिम्बोपमाः
नीरे नीरचरैः समं स भगवान्निद्राति नारायणः ।
एवं वीक्ष्य तवाविवेकमपि च प्रौढिं परामुन्नतैः
किं निन्दान्यथवा स्तवानि च पुनः क्षीरार्णव
त्वामहम् ॥ ७८ ॥

। वर्षानद्यन्योक्तिः ।

न वारयामो भवतीं विशन्तीं वर्षान(दीः)[दि]स्रोतसि
।जह्नुजायाः
न युक्तमेतत्पुरतो यदस्यास्तरङ्गभङ्गान् प्रकटीकरोषि ॥७९॥

। भ्रमरान्योक्तिः ।

पौलोमीपतिकानने विलसतां गीर्वाणभूमीरुहां
येनाघ्राय समुज्झितानि कुसुमान्याजिघ्रिरे नि(र्झ)[र्ज]रैः ।
तस्मिन्नद्य मधुव्रते विधिवशान्माध्वीकमाकाङ्क्षति
त्वं चेदञ्चसि लोभमम्बुज तदा तत्त्वं किमाचक्ष्महे
॥ ८० ॥

॥ इति श्रीमदप्पयदीक्षितवंशजाताच्चानूकविप्रणीताया
मन्योक्तिमालिकायां प्रथमाश्वासः संपूर्णः ॥

श्रीः

॥ द्वितीयाश्वासः ॥

शम्भुः शं विदधातु नः कलयतु स्थैर्यं कुलाद्रेः सुता
शार्ङ्गी शत्रुमपाकरोतु दिशतु श्रीरत्युदारां श्रियम् ।
निर्माता जगतां प्रबन्धरचने निर्मातु निष्णाततां
वक्त्रे नृत्यतु मञ्जुलेन पदविन्यासेन वाग्देवता
॥ १ ॥

ओमित्याह हिमाचलोऽस्य दयिताप्योमित्यसावेतयोः
कन्याप्योमिति देव माचिर[मिति]प्रत्येत्य ~~मन्~~र्निषु ।
क्षेमालापिषु तत्क्षणं प्रविकसद्रोमाञ्चमाविर्भवत्-
स्वेदं पाणितलश्लथाक्षवलयं स्थाणोः स्थितं पातु नः
॥ २ ॥

सम्मन्वते न साक्षात्स्तुतिमभिजाता न चेतरे निन्दाम् ।
तदुभयचिकीर्षयाहं ग्रथ्नाम्यन्योक्तिगर्हिता वाचः ॥ ३ ॥

। चन्द्रान्योक्तिः ।

कोशाः सन्ति शतं कुमुद्वति शतं रत्नानि रत्नाकरे
न स्निह्येदिह कः किमद्भुतमिदं सर्वज्ञचूडामणे ।
अव्याजेन यदेतयोरिव निरालम्बे चकोरे(थिनी)[ऽर्थिनि]
स्निह्यस्यद्भुतमेतदेव जगतामिन्दोः किरीटायते
॥ ४ ॥

नेदानीं महसां निधिः स सविता रोद्धुं जगन्मण्डलं
दिष्ट्यासौ समयो ममेति किमिदं ध्वान्त
त्वमाधावसि ।
ईषत्प्राग्विनिवृत्य पश्य तिलशो निस्तक्ष्य हेत्या क्षणात्
त्वामाशासु विनिक्षिपामि बलिमित्यद्येन्दुरुज्जृम्भते
॥ ५ ॥

दिष्टया चण्ड करः पपात रुचयोऽप्यस्यानलं प्राविशन्
आयास्यन्त्युडवः परं क्षतमितः किन्नः समायान्तु
ताः ।
वेलैषेति तमांसि यावदखिलं रोद्धुं समुद्युञ्जते
ता व(दशीत)[च्छीतलं]मण्डलाग्रमुदयप्रस्थादुदस्थाद्विधुः
॥ ६ ॥

उद्यन्त्यद्य कियन्त्युडूनि परितः क्षुद्रैः किमेतैस्तमः
शान्तिं यास्यति मास्तु किं निधिरपामो(दं)[घं]
किमायास्यति ।
मैतच्चास्तु कुमुद्वती मुकुलिता मोदिष्यते किं विधो-
र्वार्ता सापि न शक्नुयात्तदखिलं कर्तुं तवैवोदयः
॥ ७ ॥

ध्वान्तं ध्वंसयितास्मि लोचनवतां कर्ताऽस्मि नेत्रोत्सवं
सिन्धूनेधयितास्मि पङ्कजनुषां हर्तास्मि भाग्योन्नतिम् ।
आशाः पूरयितास्मि किं च वसुभिः पश्येत्युदञ्चन् विधुः
क[र्तुं] तन्निखिलं क्षमेत निपतेद्राहुर्न चेदन्तरा
॥ ८ ॥

आत्रेयोऽसि कलाधरोऽसि शिरसा सर्वज्ञसंभावितो-
ऽस्यश्रान्तेषु वसुप्रदोऽसि कलयन्नेवासि विष्णोः
पदम् ।
इत्याशस्य गुणाकरे त्वयि निशाकान्तैष पद्माकरो
यत्पद्मं परिवर्त्य वर्तत इदं तद्दुःश्रियश्चेष्टितम्
॥ ९ ॥

आलोको यदि दुःसहो यदि सुतः प्राणान्तकृत्प्राणिनां
व्याहर्तुं कुमुदाकरश्च यदि ते साधो सुधादीधिते ।
अभ्यर्चेत्कुसुमैः परीमलभृतैः हृद्यैर्वचोभिः स्तुयात्
प्रह्वैर्मौलिभिरानमेदपि तदा लोकोऽखिलस्त्वामपि
॥ १० ॥

सन्त्यस्मिन् क्षितिमण्डले त्रिचतुरा रम्यश्रियो व्यक्तयः
तासामप्यरविन्दिनी कुमुदिनीत्यव्याजरम्ये उभे ।
रूक्षं पश्यसि काञ्चिदत्र सरसं काञ्चित्समालोकसे
किं वक्तास्मि कलानिधे यदि भवानेवैवमाचेष्टते
॥ ११ ॥

श्रीरिन्दोस्सहजैव ते कुवलयं (पश्यन्)[वश्यं]मणीनां निधिः
सोता पञ्चवदान्यमौलिमणयः क्षोणीरुहाः सोदराः ।
आचक्राद्रि कराश्चलन्ति नियतं किश्चासि राजा तदप्य-
ङ्के तानवमभ्यवीक्ष्य भजसे भिक्षुं किमाप्तुं चिरात्
॥ १२ ॥

यद्गात्रावयुतं द्विजाभिहननं यद्वारुणीसेवनं
यन्नालीकसुवर्णचौर्यमपि यद्भोगः कलत्रे गुरोः ।
एतत्सर्वमनाकलय्य किमिति त्वां मौलिना श्लाघते
सर्वज्ञोऽपि विधो किमौषधमदा नन्वोषधीशो भवान्
॥ १३ ॥

। समुद्रान्योक्तिः ।

क्ष्माभृन्मण्डलसार्वभौमतनयं को वा न संभावयेत्
को वा सद्म समागतं न महयेज्जामातरं श्रीपतिम् ।
न श्लाघापदमम्बुधेस्तदुभयं तत्ते परं कीर्तयेत्
यत्प्रादाद्धवलांशुकं कुवलयप्रेक्षापदं भिक्षवे ॥ १४ ॥

कन्या मङ्गलदेवता शुचितमा गङ्गैव सा गेहिनी
जामाता पुरुषोत्तमो यदि ततः साक्षात्स चिन्तामणिः ।
त्वय्येवायतते कुलं क्षितिभृतामब्धे तवैतावतो
भाग्यस्यापि निदानमीश्वरशिरस्यम्भःप्रसूनार्पणम् ॥१५॥

विश्वं मेघमुखेन रक्षसि गिरीन् शक्रात्परित्रायसे
सर्पात्पातकिनं पुनासि महयस्यभ्यागतं बाडवम् ।
प्रत्युत्तिष्ठसि दूर एव कलयन् बालं कलावन्तम-
प्यब्धे किं बहुना त्वदेकशरणश्लाघ्यो गुणानां गणः
॥ १६ ॥

उत्पीडोऽद्य कियानयं कियदिदं बीचीसमुद्वल्गितं
बारां कीदृगदः प्रसर्पणम(सा)[पा]माडम्बरः कीदृशः ।
सिन्धो संवृणु सर्वमस्ति विदितं मैषा मनीषास्तु ते
नन्वास्ते कुशली तटे क्षितिभृतस्त्वद्दर्पहारी मुनिः
॥ २२ ॥

(याचत्याग्निनिकेतनचन) [याच्यो नाम्रिनिकेतनः] त्रिभुवने जीमूतवाहादयो
दत्त्वासूनपि पश्च नैव जगदुर्विस्मृत्य बा जातु तत् ।
काले बारिमुचे कदाचिदुदधिः क्षारातिरूक्षं जलं
प्रादात्किञ्चन तेन संप्रति कियन्नक्तंदिवं क्रोशति
॥ २३ ॥

यस्मिन् पक्षभृतां शतं क्षितिभृतां यस्मिन् शुचिर्बाडवः
दृप्तोत्सादनसाहसी स च सदा जागर्ति यस्मिन् हरिः ।
अङ्गुष्ठद्वयसेन कुम्भजनु(षं)[षा] वाचंयमेनोदधिः
तादृक्षो यदि पर्यभावि हृदयं जानातु को वा विधेः
॥ २४ ॥

धिग्धिग्जीवनमीदृशं तव पयोराशेऽन्वहं त्वत्पुरे
यन्मुञ्चन्ति तृषा पयः पय इति प्राणानमी देहिनः ।
वेशन्तस्स कियानमुष्य च कियत्पाथः कियन्‌ं च तत्
कालं स्थास्यति तावतैव कति कत्युज्जीवयत्यध्वगान्
॥ २५ ॥

। कौस्तुभान्योक्तिः ।

कोणे क्वापि निवेशितः प्रलघुभिः न्यग्भावितः शैवलै-
र्यादोभिः सममीक्षितः प्रतिमुहुः प्रोत्सारितो वीचिभिः ।
शश्वत्कौस्तुभ सेवसे जलनिधिं जानाति नत्वामसौ
विज्ञातुं बहुमन्तुमप्यथ पुमानास्ते स एवादिमः
॥ २६ ॥

अश्मानस्त(मि)[इ]मे जलाकरममुं कामं जुषन्तां नत-
द्युक्तं कौस्तुभ तस्य ते समुचितं तत्तादृशामश्मनाम् ।
क्वासिष्ये व्यमुचं यदीममिति मा मंस्था मुरारेरुर-
स्युन्मीलत्कमलाविलासभवने सानन्दमासिष्यसे ॥ २७ ॥

। मेघान्योक्तिः ।

सारङ्गाः सभयं द्रवन्ति मुनयस्ताटस्थ्यमाबिभ्रते
शोचन्ति प्रतिकर्तुमक्षमतया तद्बालकाः केवलम् ।
उन्नृत्यन्ति सहस्ततालमभितो व्याधाश्च हा चन्दनं
(ङ्गा)[दा]वो वारिद दन्दहीति किमिति त्वं जोषमालोकसे ॥ २८ ॥

मूलान्यध्वगताः फलानि शकुनाः पुष्पाणि पुष्पन्धयाः
यस्याश्रित्य गतश्च[श्व] वासरमजानानाः सुखेनासते ।
भूमावुन्नतिमान् स एष विटपी ग्रीष्मेऽवतीर्णेऽपि च
(प्राणोऽयं)[प्रायायं] वृणुते शरण्यमचलश्रीरस्त्वसौ वारिदः ॥ २९ ॥

कासाराः कति निर्झराः कति जलाधाराः कतीह क्षितौ
प्रेक्ष्ये तानखिलान् तृषापि सलिलं तेभ्यो न ये गृह्णते ।
सारङ्गास्त इमे स्वयं त्रिचतुरानादातुमम्भःकणान्
त्वामेव प्रतिपालयन्ति घन हे त्वद्भागधेयं कियत् ॥ ३० ॥

विद्युद्भिर्हतमक्षि निष्ठुररवैः श्रोत्रं प्रणष्टं रजो-
वर्षैश्छादितमाननं शिथिलितौ पक्षौ च वर्षोपलैः ।
दुर्वर्षा(श)[ज]ललिप्सया बत तदप्युत्पातवाताश्रयं
पाथो(दं)[द]प्रतिपालनाय वलते मुग्धाशयश्चातकः ॥ ३१ ॥

त्वामम्भोद परिभ्रमन्तमुदधिष्व ।द्रिष्वण्येष्वपि
प्रागम्लानमनाः क्रियन्ति न दिनान्यन्वभ्रमीच्चात(का)
[क]ः ।
द्वे तिस्रः कणिकाः कथञ्चिदपि तद्वक्त्रे विकीर्यारटन्
सिन्धुष्वद्रिषु किञ्च धन्वसु निरुच्छ्वासं कियद्वर्षसि
॥ ३२ ॥

अग्रे तिष्ठति मन्दमेत्य किमपि प्रस्तौति वक्तुं हृदा
जोषंभावमुदीक्ष्य नावसर इत्यास्ते न दृष्टद्याः पुरः ।
अन्वक्षं पुनरभ्युपैति शिखिनः संभाव्य संभाविता-
नेवं भ्राम्यतु वारिवाह कति वा वारानयं चातकः ॥
॥ ३३ ॥

ग्रीष्मं रोत्स्यसि तं च जेष्यसि रविं (विवैक) [लोकैक]
सन्तापिनं
संरक्षिष्यसि चातकान् क्षितिरुहामुल्लासमाधास्यसि ।
तापं चाप्यपनेष्यसीति जनता त्वामाशया प्रेक्षते
त्वं त्व(म्बोध)[म्भोद] रटन् कठोरमभितोऽवज्ञानलं
मुञ्चसि ॥ ३४ ॥

नीपानातनुते निबद्धमुकुलानाविस्मितं केतकं
निस्तन्द्रं कुटजं नटच्छिखिकुलं निस्तापमुर्वीतलम् ।
नैतत्सर्वमसाधु किन्तु जल(ध)[द] क्रोधो न चेद्वच्मि ते
न स्थाने तदुदारवाचि विमले हंसेऽपराध्नोषि यत्
॥ ३५ ॥

आ(लो)[ला]पैरमृतोर्मिलैः सुमनसां चेतःसमाकर्षिणो
मा(ल्या)[न्या]न् विश्वसृजोऽपि निर्मलगुणानुत्सार्य
हंसानिमान् ।
मण्डूकान् कटु राविणः कटुतरक्रेङ्कारिणो बालकान्
किं सत्कृत्य पयोद लब्धमियता कालेन तच्चिन्तय
॥ ३६ ॥

आ ाारो विमलो वचोऽतिसरसं हृद्या गतिः पुष्करे-
ष्वावासः पयसो विवेचनविधौ पो गिरां, पाण्डिती ।
यस्यैते महनीयताप्रतिभुवो भावाः स हंसो न चे-
न्मान्यस्ते[तु] तवैवमस्तु जगताप्ये(नं)[वं] किमासिष्यते
॥ ३७ ॥

राजानं न्यरुणः क्वचित्कुवलये कृत्स्नेऽप्यमुष्णाः श्रियं
मित्रं चाप्युपरुध्य तस्य चलितानाशास्वरौत्सीः
करान् ।
आशामप्यलुना विशिष्य भुवने हसं द्विजानामपि
त्वं जोषं घन याहि भद्रमखिलं घर्मः स एवास्तु नः
॥ ३८ ॥

हेलाचान्तपयोनिधेः शमवतां कोटीरकोटीमणे
[1] रास्थायाभिमुखं पयोदशकलं सन्दर्शिताडम्बरं
उत्कूलप्रसृताश्च मौक्तिकमणिच्छायाचमत्कारिभिः
प्रायः शुक्तिमुखैर्हसन्त्यनुकलं तत्रापगावीचयः ॥ ३९ ॥

लोकालोकमुपेत्य तत्र सुचिरेणाश्रित्य वाचांनिधिं
व्याहारैः परितोष्य तं च मधुरैः कालेन तुष्टादितः ।
हंसोऽयं प्रतिगृह्य जीवनकृते पद्माकरं कश्चिद-
प्यस्मिन्नास्त न वा क्षणं बत घनः पापी तमद्रावयत्
॥ ४० ॥

मन्दं वाति पुरो मरुज्जलधरः श्यामः समुज्जृम्भते
विष्वग्विद्युदुदञ्चति स्तनितमप्युच्चैरितः श्रूयते ।
त(द्व)[दृ]ष्टिर्भवितेति चातकगणः पन्थानमुद्वीक्षते
पाथोदस्तदवेत्य दास्यति [कणान्] द्वित्रा(नमुष्येति वा)
[नमुष्मै न वा] ॥ ४१ ॥

---

[1]अस्यैव पादस्य पाठान्तरं मातृकायामित्थं वर्तते ।
आस्थायाभिमुखं पयोदशकलं तत्रापगावचियः'

आयातो जलनिर्भरो जलधरो दिष्ट्याद्य घर्मो गतः
तन्नः स्वस्ति समेष्यतीति शिखिनः कृत्वा पुरश्चात-
कान् ।
केकालापकृतश्चलन्त्यभिमुखं मेघस्तु वर्षोपलैः
तानापीड्य दहन्निव प्रतिपदं विद्युद्दृशा वीक्षते
॥ ४२ ॥

यद्गानं शिखिनां शृणोषि नटनं यत्प्रेक्षसे विद्युतां
स्वच्छं व्योम यदातनोषि मलिनं रूक्षं च (मु)[य]-
त्क्रोशसि ।
नैव त्वं कुरुषे तदभ्र न तवोपर्य(सि)[स्ति]दोषो मनाग्
यस्त्वामीदृशमाबिभर्ति पयसां वाच्यस्स एवोदधिः
॥ ४३ ॥

श्रीमन् वारिधर त्वयि प्रसरति प्रायः शुचा चातकी
निश्वस्यायतमश्रुदुर्दिनमुखी त्वन्मार्गमेवेक्षते ।
सास्ते क्वेति च किञ्चिदप्यगणयन्नागत्य च त्वं तटि-
द्रम्यं नृत्यति मञ्जु रौति शिखिनीत्यभ्रान्तमुद्भ्राम्यसि
॥ ४४ ॥

पश्चाद्व्योम्नि निषद्य पश्य तटितो नृत्तं सुखं वारिद
क्वैष त्वं विचलिष्यसि क्व तटिदप्येषा विनिर्यास्यति ।
कालादेष बहोस्तृषातरलितस्त्वद्वक्त्रदत्तेक्षणो
भूयः सीदति चातकोऽस्य वितर प्राक् प्राणभिक्षां
द्रुतम् ॥ ४५ ॥

प्रायो वारिद किं ब्रवीषि [परुषं] न स्मो बकास्ते खलु
श्रुत्वैतानि वचांस्यनन्यगतयः प्राणान् बहूकुर्वते ।
चक्राङ्गांस्त्वमवेहि नो न वचसां योग्या वयं तादृशा-
मागच्छाम यतः पुरा तदधुनाप्यस्त्येव दिव्यं सरः
॥ ४६ ॥

यत्पल्लवः समभवत्कुसुमं यदासी-
तत्सर्वमेव भवतो जलद प्रसादः ।
यद्भूरुहे फलविधौ न ददासि वारि
प्राचीनमम्बुद यशो मलिनं करोषि ॥ ४७ ॥

लोके मानसवासिनः शुचय इत्याहृत्य तानब्जभूः
श्रीनित्याश्रयशोभिनीं कमलिनीं तेभ्यो ददौ जीवि-
काम् ।
त्वं तावत्समुपेत्य वारिधर तानुत्सार्य तज्जीविका-
मप्याच्छिद्य तथा बकांश्च महयन् क्षेमं किमालोकथाः
॥ ४८ ।

॥ हंसान्योक्तिः ॥

नामैवेदमिमे गुणाश्च निखिलाः सन्त्वेतदीया ममे-
त्याशंस्यैव बहून्यहानि पयसा दैवात्पयः सङ्गतम् ।
साङ्गत्येन तयोः क्षतं किमिव ते तच्चापि नालक्षये
तद्व्यर्थं कलहंस तद्विभजने जागर्षि नक्तंदिवम्
॥ ४९ ॥

॥ सैरिभान्योक्तिः ॥

दिष्ट्या वारिधरः समीक्ष्यत इति प्रायो मुदा बर्हिणो
व्याहर्तुं ददते मनागिव स च श्रोतुं समुत्कण्ठते ।
अस्मिन्नन्तरएव तांस्तृणमिवावज्ञाय पाथोमुचो
भावं चाप्यनवेक्ष्य केवलममी ढात्कुर्वते सैरिभाः
॥ ५० ॥

तुभ्यं सैरिभ भद्रमस्तु वदनं त्वं मत्कृते मुद्रय
श्रीमन् वारिद मा स्तन क्षणमरे मण्डूक किं
क्रोशसि ।
दिष्ट्या संप्रति केकिनी दरचलत्पिंछावलीपेशलं
नृत्यन्ती श्रवणामृतं श्रुतिमतां स्निग्धं यदुद्गायति
॥ ५१ ॥

चातकान्योक्तिः ।

जिह्वा शुष्यतु बम्भ्रमीतु नयनं प्राणाश्च वा यान्तु नो
नैवान्यं शरणं व्रजेम वयमित्युग्रतृषाश्चातकाः ।
सीदन्तीति विचिन्त्य वारिद पयः प्राज्यं त्वया दीयते
हा मध्ये विनिपत्य चण्डपवनो भङ्क्तु तदुद्भ्राम्यति
। ९२ ॥

श्रीमान् वारिधर देष्यति पयो मह्यं कदा दास्यति
क्लेशोऽयं च समापयास्यति कदेत्याशंसते चातकः ।
दिष्टयास्मिन् दयते मनागिव [घन॰] त्वं चानुकूलं चरन्
त्रायस्वैनमिदं समीरण न चेन्नाभैव हीयेत—ते
॥ ९३ ॥

सूर्यान्योक्तिः ।

ध्वान्तं क्वापि पलायते सचकितं संलीयते कौशिकः
पैशाचं नटनं प्रशाम्यति शिवाकोलाहलो हीयते ।
उन्मुच्याम्बरमप्युपैति कुहचिद्राजा च दोषाकरो
भूयः किं निखिलं प्रसीदति जगन्मित्रे (प्रोदये)
[ह्यवाधोदये] ॥ ९४ ॥

आबध्नन्निव सत्पथं रुचिमपाकुर्वन्निवान्धं तमः
चक्रेभ्यो मुदमर्पयन्निव च यः प्रागेकमास्ते क्षणम् ।
भास्वानेष विशिष्य पञ्चषवसुप्राप्त्यैव रुक्षं चरन्
आदत्ते स्वनिषेविणामपि हठात् पाथोरुहां जीवनम्
॥ ९५ ॥

त्वं भानो वसुमान्ननु त्वमधिभूः पद्माकराणां ननु
त्वं नेता ननु मण्डलस्य नयनं लक्ष्मीपतेस्त्वं ननु ।
ईदृक्षोऽप्युषसि प्रबुध्य हरितामग्रे वितन्वन् करा-
नाधत्स्वाश्वलमाः कियन्ति दिवसान्येवं प्रधाविष्यसे
॥ ९६ ॥

हा नक्षत्रमितः परं कुवलयं दोषाकरापाश्रयं
चक्रातङ्ककरं कराश्च कमलोल्लासाः कथाशेषिताः ।
निद्रायेयमहं न वैशसमिदं पश्यन् प्र(प)[ण]श्येदिति
त्यक्त्वाशामिह लोक [ब]न्धु(म)[र]पगम्भोधेर्वनान्तानगात्
॥ १७ ॥

आसन्नोदय एव यो वितनुते यानात्मनोऽप्युन्नतान्
यानब्जेष्वधिकारिणः कलयते यस्तादृशीनां श्रियाम् ।
यानेवाजहदाबिभर्त्यपि पतन् यो राहुदंष्ट्रान्तरे
हन्तैते तमपि त्यजन्ति किरणा भास्वन्नमस्तोन्मुखम्
॥ १८

ये भिन्दन्ति तमांसि ये जनिमतां जाड्यं समाच्छिन्दते
ये पाथोरुहमण्डलेषु मुषितां प्रत्याहरन्ति श्रियम् ।
ये मौलौ पृथिवीभृतामपि पदं न्यस्यन्ति ते भानवो
याताः क्वापि तमोभ(ने)[णें]ऽद्य स भवान्निर्विघ्नमोजाय-
ताम् ॥ १९ ॥

ध्वान्तं सत्पथरोधि दीप कुहचिल्लीनं वसूनां पतिः
श्रुत्वा हन्तुमगान्निजं वसुभरं विन्यस्य साधु त्वयि ।

पाठान्तरम्—

प्रत्यक् सीम्नि तमोनिबर्हणकृते यास्यन् वसूनां प्रभुः
स्निग्धेति त्वयि दीपिके वसुभरं सायं न्यधादात्मनः ।
(उत्तरार्धो लिख्यते पाठद्वयस्यापि)
भूयः प्रातरुपेयुषे वितरितुं तस्मै तदीयं ततो
वैवर्ण्यं कियदद्य हन्त कियती ग्लानिः कियान् संभ्रमः
॥ ६० ॥

॥ पद्माकरान्योक्तिः ॥

एतत्पद्मिनि चारु चारु जगतामेतद्दृशानन्दनं
लालित्येन तवानुरज्यतितरां स्वामी शुचीनां च यत् ।
स्थूलोऽयं महिषो विहृत्य वदनान्य(त्य)[भ्य]र्णमेत्यान्वहं
यत्त्वय्येव रिरंसया विवलते तन्मे मनो लुम्पति
॥ ६१

भास्वानस्तमियाय कीटमणयो वल्गन्ति निर्यन्त्रणं
हंसा मू(ख)[क]दशामगुः कलकलं व्यातन्वते कौशिकाः ।
एतद्वीक्षितुमक्षमा कमलिनी गाढं निमील्याम्बुजं
निःशङ्कं कबलीकरोति मधुपव्याजेन हालाहलम्
॥ ६२ ॥

किञ्चित्कुड्मलिते मया सरसिजे प्रत्यूढदृष्टयुत्सवा
नन्वेषा जगतीति मास्म मनुथाः स्वप्नेऽपि पाथोजिनि
नामेकामवलम्ब्य सूनुविशिखोऽप्योजायते मन्मथः
सा चेदस्ति सुधामयूखकलिका स्यादेव नेत्रोत्सव
॥ ६३ ॥

पाथः सारसगन्धि वीचिमरुतः श्रान्तक्लमच्छेदिनो
वैमल्यं (विददा)[वियतोऽ]तिशायि हृदयानीतश्च
गम्भीरिमा ।
श्लाघ्या एव सरोरुहाकरगुणाः ग्राहस्त्वन्तर्वसन्
साधून् स्नातुमुपेयुषोऽग्रचरणग्राहं समाकर्षति ॥ ६४ ॥

यन्नाभिः पुरुषोत्तमस्य समभूत् यत्केलिगेहं श्रियो
मित्रस्याभ्युदयोऽस्त्विति प्रतिदिनं यत्प्रातराशंसते ।
तस्मिन् सत्यपि वारिजे मधुक(रो)[रा] हा पश्य वैदेशिका
नालं किं सकृदुत्तमाः कुवलये किं नावकाशोऽस्ति ते
(?) ॥ ६५ ॥

मित्रं चास्तमितं निसर्गकुटिलं राजानमभ्यागतं
दर्शंदर्शमिदं किमापतितमित्यम्भोजमुत्ताम्यति[1] ॥ ६६ ॥

। मधुकरान्योक्तिः ।

अम्भोजं न किमद्य संप्रति न किं नीलोत्पलं नाधुना
किं सौगन्धिकमन्ततो भुवि (किगन्यं न)[सुमं चान्यन्न]
किं सांप्रतम् ।
अस्मिन् जिह्मगसङ्कुले परिपतत्युज्झम्य किं केतके
भ्रातः षट्पद ते पतिष्यति मुखे धूलीति ब्रूयामहे॥ ६७ ॥

---

[1] अस्य पद्यस्य पाददृयमेव मातृकायां वर्तते ।

। बकान्योक्तिः ।

मा रम्या गतिरस्तु मा च मधुरा गीरस्तु प्राचास्तु ते
धातारं समुपासितुं बकमनो माचास्तु भव्यं वपुः ।
भुङ्क्षे त्वं यदि केसराणि न दृशा यादो यदि प्रेक्षसे
जोषं तिष्ठति च क्षणं यदि तदा हंसः कथं नासि
नः ॥ ६८ ॥

उन्नम्यानिनमानिमील्य नयने संयम्य वाचं बकः
स्थित्वा चैकपदा चरन्निव तपो यो भाति
निध्यायताम्
पाठीनाः शतमालुठन्ति जठरे तस्यैव तन्नेति चेद्
ब्रूषे तानाचिरेण पश्य बहिरानेष्ये विपाट्योदरम्
॥ ६९ ॥

। शरभान्योक्तिः ।

क्रोधोत्फुल्लसटाभरं परिशिरोविष्टब्धवालाञ्चलं
प्रेक्षाकम्पितदिक्तटं प्रतिदिनं न्यासानतक्ष्मातलम् ।
व्यादीर्णाननमुद्भटं प्रचलः[तः]कुञ्जादिभारेः पुरः
कोऽन्यः शंसतमन्तरेण श(रा)[र]भं निष्क(म्य)[म्प]
मासिष्यते ॥ ७० ॥

उद्वृत्ताः कति पोत्रिणोऽद्रिकटके दृप्ताः कति द्वीपिनो
माद्यन्तः कति दन्तिनः कति बलोत्क्षिप्ता मृगस्वामिन ।
सत्स्वेतेषु यशास्विनः शरभ ते मुग्धे कुरङ्गार्भके
संरंभो यदि हा यशस्तव परं भज्येत किं तेन
नः ॥ ७१ ॥

पुच्छास्फोटनचूर्णितक्षितिभृतामन्योन्यमुत्क्रुध्यता-
मालोकि द्विपवैरिणां सकुतुकं येनाभियोगो मुहुः ।
व्याधः सोऽयमितो विलोकय मनागित्यर्थितोऽप्यार्भटीं
किं प्रेक्षेत शुनां निरस्तविघसग्रासकचर्वाभृताम्
॥ ७२

३५ । वृकाद्यन्योक्तिः ।

[दा]नामोदितदिक्तटाः करटिनो विक्रान्तिकेलीगृहाः
सिंहाः साहसकारिणश्च शरभा यस्मिन् विजह्रुश्चिरम् ।
[त]स्मिंस्तादृशि शैलराजकटके द्वित्राःशृगाला वृकाः
श्वानश्चाद्य कुतश्चिदेत्य कियदाः पाण्डित्यमातन्वते
॥ ७३ ॥

सिंहे क्वापि गते [तथा]निजवशामासाद्य याते गजे
शार्दूले महिषोपरि प्रचलिते निद्रालसे भल्लुके ।
कर्णाकर्णिकयावकर्ण्य तदिदं दिष्ट्येति वल्गन् मुहुः
तेषामेव पदे निविश्य कियदाः शब्दायते जम्बुकः
॥ ७४ ॥

माद्यद्दिग्गजदर्पलुण्ठनकलापारीणकण्ठध्वना-
वात्मा(नं) [व]स्थितिवादमात्रविपिनातङ्कप्रसङ्गापहे ।
यत्र क्वापि कुतूहलेन चलिते हर्यक्षचूडामणौ
स्थाने तस्य निषद्य हन्त न स्तत्साम्यमाशंसते
॥ ७५ ॥

४ । सिंहान्योक्तिः ।

अग्रे पश्यसि चक्षुषापि न मृगानारब्धकोलाहलान्
कामं द्रुह्यसि हास्तिकाय कुरुषे मौलौ पदं क्ष्माभृताम् ।
उत्पत्त्यैव मृगाधिभूरिति यशः प्राप्नोति तत्केसरिन्
एषा ते प्रकृतिर्न कस्य सरणिं वाचामतिक्रामति
॥ ७६ ॥

चण्डेन ध्वनिना तव क्षितिभृतामाध्मायते कन्दरो
व्याहन्ति प्रतिशब्द एव करिणो विद्राव्य धीरानपि ।
गाधा यत्र सम(स्थितं)[स्नि]तद्वनमपि स्मर्तुं जगद्वेपते
तत्पार्श्वे(च स)[शुनकैः] मृगेन्द्र भवतो निस्सीममो-
जायितम् ॥ ७७ ॥

। बकान्योक्तिः ।

मा रम्या गतिरस्तु मा च मधुरा गीरस्तु माचास्तु ते
धातारं समुपासितुं बक मनो माचास्तु भव्यं वपुः ।
भुङ्क्षे त्वं यदि केसराणि न दृशा यादो यदि प्रेक्षसे
जोषं तिष्ठसि च क्षणं यदि तदा हंसः कथं नासि
नः ॥ ६८ ॥

उन्नम्याननमानिमील्य नयने संयम्य वाचं बकः
स्थित्वा चैकपदा चरन्निव तपो यो भाति
निध्यायताम्
पाठीनाः शतमालुठन्ति जठरे तस्यैव तन्नेति चेद्
ब्रूषे तानचिरेण पश्य बहिरानेष्ये विपाट्योदरम्
॥ ६९ ।

। शरभान्योक्तिः ।

क्रोधोत्फुल्लसटाभरं परिशिरोविष्टब्धवालाञ्चलं
प्रेक्षाकम्पितदिक्तटं प्रतिदिनं न्यासानतक्ष्मातलम् ।
व्यादीर्णाननमुद्भटं प्रचलः[तः]कुञ्जादिभारेः पुरः
कोऽन्यः शंसतमन्तरेण श(क्र)[र]भं निष्क(म्य)[म्प]
मासिष्यते ॥ ७० ॥

उद्वृत्ताः कति पोत्रिणोऽद्रिकटकं हताः कति द्वीपिनो
माद्यन्तः कति दन्तिनः कति बलोत्क्षिप्ता मृगस्वामिन ।
सत्स्वेतेषु यशास्त्वनः शरभ ते मुग्धे कुरङ्गार्भके
संरंभो यदि हा यशस्तव परं भज्येत किं तेन
नः ॥ ७१ ॥

पुच्छास्फोटनचूर्णितक्षितिभृतामन्योन्यमुत्क्रुध्यता-
मालोकि द्विपवैरिणां सकुतुकं येनाभियोगो मुहुः ।
व्याधः सोऽयमितो विलोकय मनागित्यर्थितोऽप्यार्भटीं
किं प्रेक्षेत शुनां निरस्तविघसग्रासकचर्चाभृताम्
॥ ७२

। वृकाद्यन्योक्तिः ।

दानामोदितदिक्तटाः करटिनो विक्रान्तिकेलीगृहाः
सिंहाः साहसकारिणश्च शरभा यस्मिन् विजहुश्चिरम् ।
तस्मिंस्तादृशि शैलराजकटके छिद्राःशृगाला वृकाः
श्वानश्चाद्य कुतश्चिदेत्य कियदाः पाण्डित्यमातन्वते
॥ ७३ ॥

सिंहे क्वापि गते [तथा]निजवशामासाद्य याते गजे
शार्दूले महिषोपरि प्रचलिते निद्रालसे भल्लुके ।
कर्णाकर्णिकयावकर्ण्य तदिदं दिष्टयेति वल्गन् मुहुः
तेषामेव पदे निविश्य कियदाः शब्दायते जम्बुक.
॥ ७४ ॥

माद्यद्दिग्गजदर्पलुण्ठनकलापारीणकण्ठध्वना-
वात्मा(नं) [व]स्थितिवादमात्रविपिनातङ्कप्रसङ्गापहे ।
यत्र क्वापि कुतूहलेन चलिते हर्यक्षचूडामणौ
स्थाने तस्य निषद्य हन्त ... न स्तत्साम्यमाशंसते
॥ ७५ ॥

। सिंहान्योक्तिः ।

अग्रे पश्यसि चक्षुषापि न मृगानारब्धकोलाहलान्
कामं द्रुह्यसि हास्तिकाय कुरुषे मौलौ पदं क्ष्माभृताम् ।
उत्पत्त्यैव मृगाधिभूरिति यशः प्राप्नोति तत्केसरिन्
एषा ते प्रकृतिर्न कस्य सरणिं वाचामतिक्रामति
॥ ७६ ॥

चण्डेन ध्वनिना तव क्षितिभृतामाध्मायते कन्दरो
व्याहन्ति प्रतिशब्द एव करिणो विद्राव्य धीरानपि ।
गाधा यत्र सम(स्थितं)[स्नि]तद्वनमपि स्मर्तुं जगद्देपते
तत्पार्श्वे(च स)[शुनकैः] मृगेन्द्र भवतो निस्सीममो-
जायितम् ॥ ७७ ॥

उच्चै: क्रोशतु जम्बुकः प्रतिमुहुः श्वा निष्ठुरं बुक्कतु
श्रुत्वा(व)[वा]सम एव कश्चन तयोर्भूयः
प्रतिक्रोशतु ।
इहा चेत्तव गर्जितुं मृगपते वच्मि त्वरा(म)[मा]स्तु ते
हस्ती गर्जति यावदेव पुरतस्तस्यास्तु ते पाण्डिती
॥ ७८ ।

प्रेङ्खद्दानपयस्तरङ्गितकर्णं दन्ताग्रसंचूर्णित-
क्षोणिभृत्कटकान्निपात्य करिणो नातृप्यदीषच्च यः ।
सिंहोऽसौ शशके पतेति शबरैर्मुग्धैर्मुहुश्चोदितः
क्षोणीमेव लिखन्नखैः किमपि धिङ् नम्राननं
ध्यायति ॥ ७९

द्रागुत्प्लुत्य पतन् घटासु करिणां यः प्राङ् मृगग्रामणी-
रातस्तार मणीभिरात्मपद[तो]निर्भिद्य कुम्भस्थलीः ।
दूर्वाग्रस्खलनेन सोऽद्य कुहचित् कूपे निपत्य भ्रमन्
किं ब्रूयामुपहास्यते विगलिताशङ्कं सृगालैरपि ॥ ८० ॥

एवं हन्मि तथैव हन्मि करटीन् किं मे कियानित्यसौ
सिंहो गर्जतु तत्सहे तदुचितं तस्य द्विपोन्माथिनः ।
श्वा चायं स इवाभिपत्य कलयेन्निर्भीति यद्यार्भटीं
सामान्योऽपि न तत्सहेत सहतां मानी स हस्ती
कथम् ॥ ८१ ॥

आलेख्येऽपि लिखन्तु नाम सुचिरं निध्याय वैज्ञानिकाः
कोपाटोपविनिद्रकेसरभरान् पारेसहस्रं हरीन् ।
किं ते शक्नुयुरर्दितुं करटिनः कण्डूलगण्डस्थलान्
(तं चा)[तच्चा]तिष्ठतु पातितोडुपटलं भञ्जेयुरप्यन्ततः
॥ ८२ ॥

५० । अगस्त्यान्योक्तिः ।

•१ दुष्प्रेक्षानपि वाडवेन शुचिना सप्तापि पाथोनिधीन्
प्रागाचम्य दिवो निपात्य नहुषं कृत्वा च विन्ध्यं तथा ।
को वेदेति निमील्य चाद्य नयने जोषं मुने वर्तसे
त्वामीदृक्षमसूत यात्र भुवने मान्या घटी सैव नः ॥ ८३ ॥

विन्ध्यं वन्ध्ययतु प्रभुं च सरितामाचामतु (स्वप)[स्वः प]तिं
स्वर्गाच्च्यावयतु क्षिणोतु जगतां वातापिमातापिनम् ।
अस्त्यन्यद्यदितोऽपि दुष्करतमं त(चा)[स्या]स्तु कर्ता मुनिः
कुम्भीसूनुरिति प्रथास्य विषमा किं तेन निर्यास्यति ॥ ८४ ॥

। चन्दनान्योक्तिः ।

श्रीखण्डद्रुम खण्डितोऽपि शबरै(रश्यो)[स्संशो]षितोप्यातपैः
कृत्तोऽपि ककचै प्लुतोऽपि सलिलैर्घृष्टोऽपि शाणोपले ।
सौरभ्यं सहजं विशिष्य कलयंस्त्वं नात्मनः केवलं
सेव्यस्यापि महीभृतस्तिलकयस्याशामुखं कीर्तिभिः ॥ ८५ ॥

भद्रश्रीरिति नाम साधु भजसे श्रीखण्डभूमीरुह
स्वाभेदं नयसे तरूनपि परान्नेदीयसस्सौरभैः ।
यश्चण्डः पवनः स ते परिचयादासेवते सेव्यता-
मीदृग्भाग्यमिदं तवैव भुवने कस्यास्ति संभावय ॥ ८६ ॥

उच्चैर्गोत्रमुपैषि लिम्पसि दिशो लोकोत्तरैः सौरभैः
मूर्ध्ना विष्णुपदस्पृशा प्रकटयस्यौन्नत्यमन्यादृशम् ।
विन्ध्योच्छ्रायमसासहिः स मुनिरुच्छ्रायं तवापेक्षते
श्रीकण्ठागम तावकं गणयितुं (कवयितुं). भाग्यं क एते वयम् ॥ ८७ ॥

शिवान्योक्तिः ।

अत्युल्लेखगुणोज्ज्वले सुमनसां स्तोमेऽपि नेत्राग्निभौ
यं कश्चित्कितवं निवेश्य शिरसि स्वामिन् भवान्नृत्यति ।
न्यक्कारः किममुष्य तेन किमु सत्कारोऽस्य वा विद्मपि
दृष्टं वच्मि यथातथास्तु गुणवद्द्वेषि प्रभूणां मनः
॥ ८८ ॥

एकैवालमसौ सुधांशुकलिका मात्रास्थि मात्रोरगो
ह्यातव्येन च भीषणेन च परिष्कारो न दृष्ट
क्वचित् ।
सर्वज्ञोऽसि न ते किमप्यविदितं तच्चास्तु कस्ते वदेत्
जातं जातमुदीर्य किं भव भवान् नृत्यद्विमुच्याम्बरम्
॥ ८९

। काकान्योक्तिः ।

आनीलं वपुराबिभर्तु करटश्चूताङ्गणे सञ्चर-
त्वन्तश्चञ्चुं दधातु तरिकसलयं साकं पिकैः खेलतु ।
अप्यस्मादधिकं करोतु किमसौ किं वा वयं कुर्महे
नायं कोकिल इत्यमुष्य रुशती व्याख्याति वागेव
तम् ॥ ९० ॥

कृत्स्नं विश्वमिदं विधाय महता यत्नेन यः पद्मभूः
तच्चानन्दयितुं ससर्ज कृपया माध्वीगिरः कोकिलान् ।
भूयो हन्त स एव चेत्प्रतिभयव्याहारिभिर्वायसै-
रप्येतद्व्यथयेदमुष्य न शिरो देवो लुनीयात्कथम्
॥ ९१ ॥

कत्यम्भोनिधयस्तदन्तरगताः कत्यद्रयस्तत्तटी
रूढाः कत्यवनीरुहः कति तदालम्बा द्विजश्रेणयः ।
आहत्येदमशेषमादिकमठस्याबिभ्रतो हेलया
मन्थाद्रिस्त कियान्यदस्य भरणं तद्वा कियद्ब्रूहि नः
९२ ॥

। वसन्तान्योक्तिः ।

ये भृङ्गाः कलमुज्जगुः परभृता ये मञ्जुलं व्याहरन्
ये चान्ये न्यवसन् सुखं शुकमुखा यस्मिन् पुरा निष्कुटे ।
तत्रैवाद्य न तेषु कोपि चलिते किञ्चित्कटाक्षे मधोः
किं ब्रूयां विघसाशिनस्त्रिचतुराः काका वलन्ते परम् ॥ ९३ ॥

मूलं शुष्कमभूत्त्वचोऽपि शिथि(लं)[लाः] जीर्णानि पर्णान्यपि
(तं)[त्वां]सन्यस्तकु(मा)[ठा]रमेत्य शबराश्छेत्तुं यमभ्यापतन् ।
आमूलं नवपल्लवैरविरलश्छन्नः स एव द्रुमः
स्तूयेताद्य पिकैश्च चेत्स महिमा विश्वातिशायी मधोः ॥ ९४ ॥

। मधुकरान्योक्तिः ।

चूतोऽसौ बकुलोऽयमेष सरलः सालस्स इत्युत्क्रम-
मश्रान्तं निमिषं च वैकमपरिस्पन्दं कदासिष्यसे ।
द्वित्राः सन्त्यथ कुक्षयस्तव परं कस्माद्दले खिद्यसे
तेष्वेकं नियतं निषेव्य पिकवत् कालं नयेथाः सुखम् ॥ ९५ ॥

। पिकान्योक्तिः ।

कूजंकूजमलं पिकाद्य क इह श्रोता चमत्कारिणो
व्याहारांस्तव जोषमास्स्व कुह चित्कोणे निबध्याननम् ।
जानात्येनमनेहसं क इति भो नायं मधुः किन्त्वसौ
हेमन्तः कटुराविणां बलिभुजामस्मै स्वदन्ते रवाः ॥ ९६ ॥

कारुण्योर्मिलया दृशा स्वशरणानन्वग्रहीत्कोकिलान्
स श्रीमान् मधुरालपन्ति तदमी शब्दाश्चमत्कारिणः ।
श्रोतुं तान्न तितिक्षुरेष करटः काणो दृशा यत्किम-
प्याक्रोशत्यधिरुह्य निम्बमियता मौनं किमेष्यन्ति ते ॥ ९७ ॥

सन्ति क्षोणितले कति क्षितिरुहस्तेषामगत्वान्तिकं
काङ्क्षन्नभ्युदयं ममैव सुचिरादास्ते पिको(न्न)विनि।
जानन् सम्यगिदं रसाल समये तं पल्लवैरादरा
धत्पुष्णास्युचितज्ञतेयमनिशं जागर्त्ति चित्ते मम ॥९८॥

अश्रान्तं पिक वर्तसे लिखितवन्माकन्दसालान्तिके
मृद्वीमेव गिरं ब्रवीषि न दृशाप्यन्यं तरुं वीक्षसे।
कृच्छ्रादेष प्रियद वितर्थि किसलं तुभ्यं तथोपासिने
सर्वस्वं च ददाति हन्त कपये काकाय घूकाय च
॥ ९९ ॥

छायाभिः शिशिराभिरध्वचलितान् स्मेरैः प्रसूनैरलीन्
स्वादुस्वादुरसैः फलैश्च शकुनानश्रान्तमाह्लादयन्।
कालं य(त्किय)[क्षिप]सि त्वमाम्र सहजं तत्क्ष्मारुहां
यत्पिकान्
वल्गु व्याहरतो बिभर्षि हरितामन्तेषु तद्गीयसे
॥ १०० ॥

जायन्ते कति जज्ञिरे कति जनिष्यन्ते कति क्ष्मारुहाः
शाकोटप्रमुखाः पिकस्य किमितो जात्या कलालापिनः।
भाव्यं चूतमहीरुहैव सरसैर्भाव्यं चलत्पल्लवैः
प्राप्तव्यं च पिकेन तेन तदुपर्यव्याहतं मङ्गलम्
॥ १०१ ॥

तत्तत्प्रौढकविप्रबन्धजलधिष्वामज्ज्य वारान् बहून्
अन्विष्याधिगताः (शु)[सु]शब्दमणयो वर्णोत्तरा ये मया।
तैर्ग्रैवेयकमाकलय्य कथमप्यन्योक्तिनामोज्वलं
तुभ्यं वाणि समर्पयामि कृपया (मध्ये)[मातः]तदङ्गीकुरु
॥ १०२ ॥

गोपालार्णवनाम्नि ग्रामे मृदुसूक्तमल्लिकारामे ।
आकलितवसतिराचानकरोदन्योक्तिमालिकामेताम् ॥ १०३ ॥

। इत्यप्पय्यदीक्षितवंशजातेन आचानीति कविना प्रणीतायामन्योक्तिमालायां द्वितीयाश्वासः संपूर्णः ।

॥ अन्योक्तिमाला समाप्ता ॥

॥ सर्वमङ्गलाजानिश्शरणम् ॥

NĪTISĀRAKKARU.,

Edited by

VIDVAN V. S. KRISHNAN.

This is based on two manuscripts, one paper and the other palm leaf, preserved in the Government Oriental Manuscripts Library, Madras, bearing D.No. 178 and D.No. 177, respectively. The author of this small work is not known. The work begins with a prayer to God. This is divided into 8 Adhikāras and is complete in 66 verses.

This small work mainly deals with Rājanîti (Political Science) and teaches morals in a simple style.

நீதி சாரக் கரு.

இந்நூல், பொதுவாக மககட்கும சிறப்பாக அரசர்க்கு முரியனவாய பல்வேறு நீதிகளைத் தெரிவிக்கின்றது. " நீதிசாரக கருவை நிகழ்தது வேனே, என்ற கடவுள் வாழத்துச் செயயுளின இறுதிப் பகுதியால், இந்நூலுக்கு அமைந்த பெயர் " நீதிசாரக்கரு " எனபது புலனாகும். இதனை இயற்றியவர் இன்னார் என்று விளங்கவில்லை. இந்நூல் 8 அதிகாரங் களாகப் பகுக்கப்பட்டிருக்கின்றது. கடவுள் வாழத்துடபட 66 விருத்தப பாகக ளுள்ளன. செய்யுள் நடை எளிதில பொருள் விளங்கும் வண்ணம் அமைந்துள்ளது. இது, நூல்நிலைய டிஸ்கிரிப்டிவ் கேடலாக்கு 178-ஆம் எண்ணின கீழக் குறிப்பிட்டுள்ள காகிதக் கையெழுத்துப் பிரதியிலிருந்து பெயாதது எழுதி அசசிடப்பெறுகிறது. இதன தாய்ப் பிரதியிலுள்ள ஏடுகள் மிகவும் பழையனவாதலின் இடையிடையே முறிந்து, எழுததுக்களுட் சில மறைந்துள்ளன. D. 177-ஆம் எண் கொண்ட பனையோலைப் பிரதி யொனறும் உளது. அதனுடனும், ஒப்பிடப்பட்டு, இயனறவளவு திருத்தத் துடன இங்கு வெளியிடப்படுகிறது. அதிகாரத தலைப்புக்கள் தாய்ப்பிரதியி (Original Manuscript)-லுள்ளவாறே கொடுக்கப்படடுள்ளன.

V. S. கிருஷ்ணன்.

நீதிசாரக்கரு விஷய அட்டவணை.

நீதி சாரக் கரு.

கடவுள் வணக்கமும் நூற்பெயரும்.

1. அறிவாகி யகிலமெலா மவையின் காரணமா
   யானந்த மயமாகிப் போக்குவர வின்றிக்
குறியாகி நித்தியமா யருவ மாகிக்
   குணமாகி யசலமாய்ச் செலகதியு மாகிச
சிறிதாகிப் பெரிதாகுஞ் சித்த சித்துந்
   தெளிவுறவே தெளிந்தோர்க (ளுமளி)[டெளி]ந்த வேத
நெறியாகி நின்றபத கமலம் போற்றி
   நீதிசா ரக்கருவை நிகழ்த்து வேனே.

நூல்களினது திறமும் வலமும்

2. அறியநத் துவமூனறில நடுநின்ற வித்தை
   யதுதெளிந்த வறிவினர்க்கு மற்றதெலாந் தெளியும
அரியவிநதை தனககுநா லங்க மாகு
   மதுவிரவி நடக்கினறு நெறியுமொாலா ருகும
அரியவிவை யைந்திலட்சண வியல்புதஙீ யறிதல்
   அருஙகலவி நூலுக்குத திறம தாகும்
அரியவிவை மாறுபட நடப்ப தெல்லாம்
   அநியாயப் பகடியெனும் பொய்யவல நூலே.

3. அறியங்க நாவினது விபர முத்தி
   யலகுபெறும் பிரமாணம் பொருளாசெயலு மாகும்
அறியுத்தி முதனுலும் இரண்டிரண்டு விதமா
   மடுததெல்லா மறிதலது வுபாய வுத்தி
யிதற்குத தகப்புரிதல் தந்திரமா முத்தி
   யடுத்தெதிரே காணடலதிட்டாந் திரப்பிரமா ணந்தான்
அறிபுகையைக் கண்டுநெருப் புண்டெனவே யறித
   லதுவாகு மனுமானப் பிரமாணந் தானே.

4. அறியருவப் பொருணீதி முதலான தாகு
   மாமுயிருள் பொருளுயிரில் பொருளுருவப் பொருளா
மறியுயிர்கள் புரிசெயலுங் கடவுள்செய லிரண்டா
   மாகவிது நால்வகையா முண்மைநெறி நடககும
அறியிதன்றி யாகாயம் பூதத் தென்றை
   யைவகைக்கு மேலாம லுரைப்பதுபோல வளவும்
அறிநாலு குணத்தினரை மாறிச்சொல லுவது
   மைவகையில் பகடிநூல் பொய்நூ லாமே.

5. உளளபொரு ளொருநாளும் போவ தில்லை
யுரிமையில்லாப் பொருணடுவே வார தில்லை
உள்ளமிது உண்மைநெறி மார்க்க மாகு
முண்மைதான சுருக்கமே யெனினும் வெல்லும
உள்ளபோம் பொருள்நடுவே சிலவந் தெயது
முறுமிதற்குப் பிரமாண மிருக்கு தெனறே
உள்ளதுபோ லுரைத்தாலுந தலைகா லொனறு
ஒருகாலு மிருக்காது பொயக்கலித பகடி.

6. அறிமுதனுா றனைக்கொண்டு வழிநூல் செய்யி
லட்சரத்தின வணணமெனுஞ் சததபேத கங்கள
அறிமிகவுங் குறையாம லேறும லுந்தா
ளுகமுற நூல்செய்த லுணமைநெறித திறமாம்
அறியியலபு நீங்காத விகாரமது வாகு
மட்சரஙக ளடைவினறிச செயவ தெல்லாம்
அறியியல்பு நீங்கினதோ விகார மாகும
ஆகாத பகடிநெறி யவலமது வாமே.

7. அறிவிவகா ரமபிரமா ணம்கண் டிபபு
மதுமூனறு மொன்றேயாம் புத்தி புந்தி
அறிவிவே கத்திஞேடு நாலு மொனறு
மழகான விதரணையுந் திறமு மொனறும்
அறிவிருமபி வருந்திககற றவர்க்கே யனறி
யருங்கலவி விததைததா னவருவதரி தாகும்
அறிவிதனை யறிந்தவருக் குயாசசி யனறி
யருமைததாழ் வொருநாளும் வாரா தனறே.

8. அறியெழுத்தை யறிநதவருக் கிழிதலகமை தீரு
மதுவறிந்தான மொழிததிறத்தின கனமடையு முள்ளம்
அறிமொழியின கனமுமுக கியபபொருளா நீதி
யன்னீதி பொருளறிந்தே யன்னீதி யொருவி
அறிநீதி யடைந்துபுண ணியபாவ மறிநதே
ய(ன்)னீதி யாலெய்தும பாவமதை யொருவி
அறிபுண்ணி யத்தினது வாடிவ மாகு
யரியநிலை யெய்திநிலை நிற்பா ரன்றே.
நால்வகை குணகுணத்தினர் திறமும் வலமும்.

9. மனிதருக்கு வடிவமெல்லா மொககுமே யெனினும்
வாய்ப்பான குணஞ்செய்கை வேறுபட் டிருக்கு[ம்]
மனிதரிலே நீதிமான பகாரக் காரன
மாறுபடு துட்டனெடு மடைய னெனறு
மனிதருநால் வகையுண்டா நீதி மானு
மகததான நீதிதனை யாளு மற்றை
மனிதரன் னீதிதனை யாளு நீதி
மார்க்கத்தும் வழக்கத்துங் காண லாமே.

10. அறிதநமாத தாயிருவா குணச்சு பாவ
மவாபிள்ளைக கெய்துமறிவாமல் விளங்குமகுமா முந்தான
அறிநாலு வகையினுளு முயாவுந் தாழ்வு
மாவமியாரு வருக்கொருவா தம்மிற் றுங்கள
அறிவினர்கள் மறைபடித்தே யமர்ந்தி ருப்பா
ரறிவிலார் பறையபு ததே யுழன்று நிறபார்
அறிவரிடக் கயடக்கிக குறிப்பினு லுரைபாா
ரறிவிலமார் வெளிப்பாடையின் மொழிவா ரன்றே.

11. அறிவினரே தெளிந்தசிந்தை யாயி ருப்பா
ரறிவிலார் மலைததசிநதை யாயி ருபபார்
அறிவினரே சகலமுநதா மறிந்து கொளவா
பறிவிலா ருபதேசத தாலுங கொள்ளார்
அறிவினரே நீதிமுத னூல்வகையு மறிவார்
அறிவிலாா சிறிதன்றி முழுதுநதா மறியார்
அறிவினரே புண்ணியந்தா னீதி யெனபார்
அழிபகடி யோர்பலவாய்ப் பிதற்று வாரே.

12. நீதிமான் திடமாந்திரப் பொருளைக் கொள்வான
நீதியிலாப பகடிமலை வெல்லாங கொள்ளு[ம்]
நீதிமான நீதிச்சொற் இனப மாவான
நிலைகொள்ளாப பகடிதிரி சொல்லைககா முறுவான்
நீதிமான் சத்துருவா யுள்ளார்க டமையு
நேருமொரு மித்துருவா யாககிக் கொள்வான
நீதிமான மித்துருவா யுள்ளாாக டமைபு
நெறியறியாா பகடிகள்சத து நவாய்ககொள வாரே.

13. அறியுடலா லொருவருக்குஞ் சிலாக்கியங்க ளில்லை
யாமறிவு குணங்கலவி நீதிசிலாக் கியமாம்
அறிவினர்க்கு நற்குணமே குலபூஷ ணந்தான்
அறிவிலாாக்குத் தூர்க்குணமே யவல மாகும்
அறிவுடையோ ருண்மைதனக் கஞ்சு வாாக
ளறிவிலா ருணமையொன றுண்டோ வெனபா
அறிவுடைய திறமணுமாத் திரமே போதும்
அவலமா யிரமிருந்து மாகா தனறே.

14. நீதிமான சத்தியவான் குணவான்விவ காரி
நேருமொரு திரிபிலலா னறிவுடையோ முங்கும்
வாதுபுரி பகடியே மோசக் காரன்
வழக்கறியான திரிபுடையோ னெனறு மாகுந்
நீதுபுரி சலத்தனே துட்டன மூாக்கன்
தீங்குபுரி துடுக்கன்போக் கேறி யென்றும்
பேதறியா மடையனே மூடன சோம்பன
பேச்சொடுகா ரியமறியான் மட்டி யாகும்.

15. நீதியோர் யேலிட்டா லொருமை யாலே
நிலத்திலெல்லாரையுந்தான் காத்துரட்சிப்பார்
நீதியோர் மிகுந்தாலத் தேச மெல்லா[ம]
நீங்காத செல்வமுமினி பமுமே மல்குறு
தீதுபுரி பகடியோ ரொருமை யின்றிச்
சென்னங்களைத்தானா மதிமருட்டிப் பேதகமே படுத்தித்
தீதுபுரி பசியுடனே துன்பநோ யிவற்றுற
றேசமெல்லாஞ் சூழ்ந்திடவே செய்வா ரன்றே.

16. உலகத்தில் துட்டர்களோ யரச ராகி
லொருமையுறு செங்கோலுங் கொடுங்கோ லாகும்
உலகத்திற் பகடிகளு யந்திரிக ளாவா
ரோதுகின்ற நீதிகளு மவர்க்கேற்ற தாகும்
உலகத்தி லொருமையின்றி விகடமே யுண்டா
முறுகலக மெப்போது மோயாம லிருக்கும்
உலகத்தி லருநீதி காணு தொன்று
மொருவ ருண்ணுஞ் சோற்றைமற்றை யொருவர்கொள் வாரே.

நீதியினது திறமும்வலமும்.

17. அருமைக்கு நீதிககு விவகார முதலே
யாகுமிரண் டாம்பாதந் தரும மாகும
இருமைதரு முண்மைமூன்றும் பாத மாகு
மெண்ணுஞா னபொருளோ நாலாம் பாதம்
ஒருமைதரு சாமபேத தான தண்ட
முறுவிவகா ரத்தடங்கு குணத்தூய்மை யிதுவாம்
பெருமைதரும் வேதசாத்தி ரங்க ளெல்லாம
பேசுவது மிப்பொருளே யாகு மன்றே.

18. அன்னீதி தனக்குமுதற் பாதமே பகடி
யாகுமிரண் டாம்பாதஞ் சலமே யாகும்
அனனீதி தனககு மூன்றும் பாத மடியா
மருநீதிக் கெதிரான தனைத்துமிதி லடங்கும்
அனனீதி யொருவருக்குக் குணமா சாகு
மருங்கலைகள் குற்றமென றுரைப்பது மிதுவாம
அனனீதி நன்னீதி விபர மெல்லாம்
அறையுநீ தித்திரட்டி லறிய லாமே.

19. தன்னையுங்கண் டிப்பதுதா னவிவகாரத் தியல்பாந்
தருமங்கை மாறின்றித் தருவ தாகும்
பின்னையுமே நிலைகலங்கா திருப்ப துண்மை
பெறுநுட்பப் பொருளேஞா னமசு பாவந்
தன்னைமலை வாக்குதலே பகடி யாகுந்
தயவில்லாப் பலவந்தஞ் சலச்சு பாவம்
பின்னையுங்கா ரியக்கெடுதி மடிச்சு பாவம
பேசுநால் வகைத்திறமா மவல மூனறே.

20. நீதிநிறை கலவியே திறம தாகும்
நீதியினறிப் பகடிநிறை கல்வியவ லந்தான்
நீதிகலவி தனைபபொருந்த லனைத்துமே விளங்க
நிறைகதிரும் பகலுமொனருய்க் கலந்த தொக்கு[ம்]
நீதியினறிப் பகடிகல்வி தனைப்பொ ருந்தல
நிலவின்றி யிருளடைந்த ருசியு மொக்கு[ம்].
நீதியிலே சநதோஷ மனனீதி பிணககு
நிறுத்தலன்றி மற்றெனறி னிறுத்தலா காதே.

21. அறிசமயங் கடநததே யதீத மார்கக
மாகாத மதபேதங காம மாாககம
அறியதீத மார்க்கமொடு ஞான மார்க்க
மருநீதி மார்க்கமுண்மை மார்க்கமிவை யொன்றும்
அறிசமய மார்க்கமொடு பகடி மார்க்கம்
மாகாத காமமொடு மூடமிவை யொனறும்
அறிநீதி யறிநததே குருத்துவமு மாகு
மவையறியாா ல[ம]குத்துவமா முலகிற் றுனே.

22. ஒருமையுறு மார்க்கமே நீதி மார்கக
மொருமையிலா விகடமே யனீதி மார்க்க [ம்]
மருமையுறு நீதியென்றுஞ் சுபாவ மாகு
மன்னீதி நசித்துப்பின் விகார மாகும்
இருமையுறு முண்மையே பிறந்தோர்க் கெல்லா
மெய்துநிலை மற்றதெல்லா நிலையா காதாம்
உரியபொரு ளிவையறியாப் பொய்நெஞ் சுள்ளோர்
ஒங்குவரை குறித்துபபோய் கடல்வீழ் வாரே.

23. திரிசொல்லின் மனங்கிடந்து பொழுத றுப்போர்
தெளிநீதிப் பொருளிருந்த தறியார் போலுந்
தருமார்த்த காமமுடன் மோட்ச நாலுந்
தகுநீதிப் பொருளுலி லுறவ டங்கும்
ஒருவருக்குப் பாக்கியமு மகததுவமு மீவ
துறவாகு நீதியன்றி வேறென் றிலலை
ஒருவருக்குப் பீடையுட னிழிவு மீவ
துறவிலன் னீதியன்றி வேறில்லை யாமே.

24. நீதிநற செய்கையெனு நெறிவிளககு நெறியி
ல(ன்)னீதி துற்செய்கை தனைவி ளைக்கும
நீதிநற் செய்கையினுற் புண்ணியமுண் டாகு[ம்]
நெறியில(ன்) னீதியினுற் பாவமுண் டாகும்
நீதியது பொருள்விவே கிகளுக் காகும்
நெறியிலா வன்னீதி விவேகமிலார்க் காகும்
நீதிமான றனக்குதவி கடவுளே செய்யு[ம்]
நிக[ழி](லி)ரு வகைப்பொருளு மறிவரறி வாரே.

25. அறிபொன்னைப் பொன்செப்பஞ் செய்யுமவிவ கார
மதுதனையும் முத்தினையுஞ் செபபஞ் செய்யும்
அறிவிவகா ரஞ்சிக்கி லதுவியாச் சியமா
மறிவிவகா ரம்மறியார் தமைமாயை மருட்டும்
அறிவிவகா ரம்மறியா ரனைத்துமே யறியா
ரறிவிவகா ரந்தெரிந்தா லனைத்துமே தெரியும்
அறிதிவா கரனாலே யுலகமெல்லாம் விளங்கும்
அறிவினரா னீதியெல்லாம் விளங்கு மனறே.

26. உரியநீ திப்பொருளே முதலான பொருளு
மோ றுகின்ற தொழின்முதலாந் தொழில னைததும்
அறியவிவை யேற்பாடு செய்யு நூல்க
ளனைததுமெல்லாந் தொடர்ந்துநிற்ப நுத்திப்பிர மாணந்
தெரியுமிது விரண்டேயாம் வேறென றில்லை
செபபமிது தவறுத துண்மைநெறி யாகும்
விரியுமிது விரண்டுமே தவறி நின்றால
விபப்பிலலாப் பொய்ந்நெறியே யாகு மனறே.

27. அறிகின்ற வுபாயவுத்தி தந்திரமா முத்தி
யாகவிரு வகையுததி யிதிலடங்கு மனைததும்
அறிதிட்டாந திரமுமனு மானம்பிர மாண
மாகவிரு வகையாகு மனைத்துமிதி லடங்கும்
அறிசாத்தி ரங்களுக்குச் சூத்திர மிதுவே
யாகுமிது காரணமாஞ் சாத்திரங்கா ரியமாம்
அறியுடலுக் குயிர்போலும் பொருடொழிலுக் கெல்லா
மாகுமிரு கண்போலுங் கால்போலு மன்றே.

28. அறிபுததிக் காரணமா யுத்திக்கா ரியமா
மறிகின்ற பிரமாணங் கண்டிபபு மொன்றும்
அறியுமேற் பாடுசாத னந்திட்டஞ் சட்ட
மழகான கற்பனையுங் கட்டளையு மொன்றும்
அறியுண்மை நெறியுடனே நீதிநெறி யென்று
மடுததவிவ காரநெறி திறநெறியு மொன்றும்
அறிபகடி நெறியுடனே யவலநெறி யென்று
மழிவுதரு மவல(லைய)நெறி பொய்ந்நெறியு மொன்றே.

அரசினது திறமும் வலமும்.

29. அறியரசு தனககுநா லங்க மாகு
மரசனென்று மதிகாரச் செங்கோ லொன்று
அறிவினரு மொனருகு நீதியுமொன றுகு
மரசன்முத லனைத்தினுக்கு முரியரறி வினராம்
அறியரசுக் கன்னியரா லெப்போதும் பகையா
மபபகையை யறிவினரே தீர்க்க வேணும்
அறிவினரும் பலர்கூடித் தீரா விடடா
லரசுமே யாலரசும் பூவரசு மாமே.

30. அறியரசன் செங்கோலை யறிவினர்கை யொப்பித்
தரசனுமே யறிவினர்சொல் வழிநிற்ற லியல்பாம்
This work is divided into two parts. The first containing 110 stanzas of different metres describes the greatness of Bhadrācala as well as Bhadrācala Rāma. Of these, stanzas 99 to 109 illustrate the ten Avatāras of Lord Viṣṇu in a beautiful manner. The second part consisting of 37 ślokas describes the sacredness of Śeṣakuṇḍa and Śeṣeśvara, two holy places on the banks of the river Godāvari at the foot of Bhadrācala. In the end the poet gives the whole story of Rāmāyaṇa in an elegant style in stanzas 24 to 35.

The author of this work is one Rāghavasūri who wrote this at the instance of Sundareśa, to whom Lord Rāma is said to have appeared in a dream in the splendour of his coronation. The author salutes Parāśarabhaṭṭa and Rāmānuja in the beginning.

॥ भद्राचलचम्पूः ॥

राघवसूरिप्रणीता

॥ पूर्वो भागः ॥

श्रीमहिसेवितपदं शेषपर्यङ्कशायिनम् ।
रक्षणे सर्वजगतां दाक्षिणं राङ्गिणं श्रये ॥ १ ॥

निस्सीमवि[1]विधसीमा निगमशिखाशेखरः शिवादङ्घ्रिः ।
अस्तु दुरितच्छिदायै निस्तुलधामा मृगेन्द्रगिरिभूमा ॥ २ ॥

त्रयस्त्रिंशत्कोटित्रिदशगणसंसेवितपद-
स्सह श्रीभूमिभ्यां कनक[2]तटिनीरोधसि लसन् ।
अमन्दानानन्दान्स्वयमवकिरन्सेवकदृशो-
र्मुकुन्दश्शार्ङ्गास्त्रो मनसि मम नित्यं विहरतु ॥ ३ ॥

प्रीतः पूजनतस्तवास्मि नय मां श्रीसुन्दरेशप्रभुं
तस्याप्यस्तु मदर्चनात्सफलतेत्यादिश्य कञ्चिद् गुरुम् ।
स्वप्ने तेन मुदा[3]न्वितोऽत्र रमते यस्सुन्दरेशालये
सीतालक्ष्मण[4]संयुतोऽस्तु स विभुः पट्टाभिषिक्तो मुदे ॥ ४ ॥

मधुजिन्निजोपमेया मधुरा मधुरापुरीधुरीणो नः ।
कलयतु गिरोऽतिकान्ताः कलशपयोराशिकन्यकाकान्तः ॥ ५ ॥

कृशं मध्ये स्फीतं कुचकलशयोश्चारु वदने
गुरु श्रोणीभागे ललितललितं लोचनयुगे ।
दधत्पाण्योः पद्मे वरमभयमन्यत्रकरयो-
र्महस्तत्प्रादुष्यान्मम मनसि पाथोजसदनम् ॥ ६ ॥

---

1 विभव ।
2 नलिनी ।
3 मुदार्पितो ।
4 सेवितो ।

विलङ्घितमहोदधौ विहितरक्षसत्रासने
विमृष्टजनकात्मजाशुचि विधूतरक्षःपतौ ।
विशुद्धगुणभूषणे विनमदापदुद्धारणे
हनूमदभिधे महस्यनिशमस्तु सक्तं मनः ॥ ७ ॥

त्रिदण्डपरिमण्डितं तरलपङ्कजाक्षस्रजं
कनत्कनक[1]वाससं कलितमूर्ध्व[2]पुण्ड्रश्रिया ।
शिखा[3]रचितशेखरं शुचितरो[4]पवीतोज्वलं
श्रये यतिपुरन्दरं शमितसर्वदुर्वादिकम् ॥ ८ ॥

श्रीरङ्गराजचरणाम्बुजराजहंसं
श्रीवत्सलाञ्छनपयोनिधिपारिजातम् ।
विज्ञानभक्तिविनयादिमहागुणाब्धिं
वन्देय सम्प्रति पराशरभट्टसूरिम् ॥ ९ ॥

मिहिरान्वयमण्डनं रघूणा
रमणो मे दिशतु श्रियं समग्राम् ।
परिपुष्यतु मामनन्यभावं
करुणार्द्रैर्जनकात्मजा[5] कटाक्षैः ॥ १० ॥

सुन्दरनायकचन्द्रो निस्तन्द्रो रामचन्द्रगुणगणने ।
ग्रथ्नाति [ग्रन्थयति] चित्रपद्यैर्भद्रं भद्राचलेन्द्रमाहात्म्यम् ॥ ११ ॥

क्वाहं मन्दमनीषः क्वचन गुणा भूरयोऽद्रिराजस्य ।
इति जोषमास्थितं मामपि मुखरमुखं त एव कुर्वन्ति ॥ ११ ॥

विगुणापि वाङ्मदीया सम्पर्काद्भवति रसविदास्वाद्या ।
भद्रगिरिसत्कथानां जलमिव कूपस्य नवसितासङ्गात् ॥ १२ ॥

---

1 वाससा ।
2 पुण्ड्रोज्वलम् ।
3 विरचितश्रियं ।
4 पवीतं सदा ।
5 जाप्यपाङ्गैः

नैमिशस्थलवासिनिस्तुलशौनकप्रमुखर्षयो
भक्तियोगपुरस्सरामलभव्यकर्मगुणाश्रयाः ।
प्रोचुरूर्जितदिव्यमङ्गलसत्कथाश्रवणैषिणः
सूतमुग्रतपोबलान्वितमुत्तमोन्नतिमाश्रितम् ॥ १४ ॥

सूताखिलगीताश्रयभूतात्मगुणानां
हृद्यामनवद्यां भवताद्याशुभहन्त्रीम् ।
गाथां कृतबाधाशतरोधां वदतेत्थं
शतधुन्या धुतदैन्या भुवि मान्याश्च कृताः स्मः ॥ १५ ॥

पुनरपीदानीम् :—

घोरामयधाराहढविप्लोषणधीरां
श्रीरामगुणाम्रेडनसारां भवपूराम् ।
अन्यां त्वमनन्यां मधुधुन्या वद साधो
श्रद्धागुणबद्धान् प्रति मुग्धान् [1] प्रतिगाथाम् ॥ १६ ॥

इत्युपश्रुत्य विप्राणामुक्तिमप्रतिमौजसाम् ।
सूतः प्राह भृशं प्रीतः भद्रां भद्राद्रिसत्कथाम् ॥ १७ ॥

शृणुतेमां कथां विप्रा भद्रां भद्राचलेशितुः ।
यस्य स्मरणतो जन्तुस्सत्यमत्येति संसृतिम् ॥ १८ ॥

तथाहि :—

गोदावरीतीरे शुभे मोदावहे योगस्पृशां
श्रीराघवक्षेत्राभिधो घोराशुभध्वंसी महान् ।
भद्राचलाभिख्यो गिरिर्विद्रावितध्वान्ताश्रया
नेता भुवो यत्रेक्ष्यते सीतापतिस्सौमित्रिणा ॥ १९ ॥

पीतारुणः श्वेतासितो भात्यद्भुतो धातूत्करो
यत्राभितः स्रोतोवहामुद्बुद्धमुग्धाम्भोरुहाम् ।
यस्यां पुनर्हंसावलेः क्रीडाङ्गणादुत्सृत्वरैः
कोलाहलैः प्रौढाङ्गना काञ्चीरवोऽनुस्मार्यते ॥ २० ॥

---

[1] सुकथां नः ।

यस्मिन् बिसव्यामोहतो दन्तावलश्रेष्ठैर्मुहु-
दंष्ट्राङ्कुरव्याकर्षणं कण्ठीरवस्सम्मन्यते ।
धेनोस्तृणान्यत्तुं गतौ यत्र क्वचाटव्यन्तरे
वत्सः क्षुधा वात्सल्यवद् व्याघ्रीस्तनं चूषत्यहो ॥ २१ ॥
यस्मिन्पुनर्मूकावालिः श्लोकान्पठत्यास्थाभरात
क्षिप्रं लिखत्येनान् कुणिः पश्यत्यमूनन्धोऽनिशम् ।
शृण्वन्निमान् हृष्यत्यहो श्रोत्रेन्द्रियैर्हीनो जनो
धावत्युदीक्ष्यैतन्मुदा पङ्गुः स्वयं हीतस्ततः ॥ २२ ॥
यत्रानिशं वृष्टे घनैरुद्वेलिता नद्यो नदा
नानाविधाः प्राक्पश्चिमान् सिन्धून् विशन्त्युच्चोदकाः ।
यस्मिन्क्वचिद् रत्नाकरो हेम्नां क्वचित् राशिर्महान्
विद्युत्प्रभस्संलक्ष्यते दुर्वर्णभूर्हृद्या क्वचित् ॥ २३ ॥
क्रीडन्त्यहो यत्राद्भुते लेखाः सुखं योषासखा
नित्यं तपोऽनुष्ठीयते यत्रर्षिभिर्मोक्षार्थिभिः ।
यत्राश्रमानध्यासते हृद्यान्वलद्दारात्मजा
भक्त्यातिथेः पूजाकृतश्शक्त्या मुनिश्रेष्टः क्वचित् ॥ २४ ॥
सेवकनिकराभीष्टं प्रयच्छतो भावुकस्य तस्याद्रेः ।
भद्राभिधानभाजो महिमानं कोऽस्ति वर्णयितुमीशः ॥ २५ ।

तथापि :—

तदेकदेशलेशांशकणानुलववर्णनाम् ।
क्रियमाणां मयाकर्ण्य सन्तस्सन्तु सुनिर्वृताः ॥ २६ ॥
पुरा सुमेरुर्धराधरेन्द्रो हराचलादपि परार्ध्यभूमा
सुराधिवासस्थिरातिशयभाक् निराकृतार्को भराद्द्युतीनां
दुरापरत्नाङ्कुराभ्युदयभूस्वरामयासुतवराभिलाषी
परां तपस्याधुरां प्राबिभ्रत्त्वरातपैर्दुर्भरापदं पटु-
तरां तितिक्षुर्विरामशून्योऽमरादुपेतादिरावल्लभा-
च्चराचरेशाच्चिरात्तनूजं स रामभक्तं दुरासदौजस-
मवाप भद्राख्यं विधिरपि दुरवाप धाम निरुपाख्यम् (?)
॥ २७ ॥

तदानीं तु :—

सहृदयलोकमनःपरितोषः समजानि
सद्गुणसान्द्रे स्वयमुदयति भद्रगिरीन्द्रे ।
वलति मृदु स्म तदा पवमानः
सुरभिसुशीतशरीरः कृतजगदगदः शुभाचारः ॥ २८ ॥

ननृतुरथाप्सरसस्समवेता-
श्चरणरणन्मणिभूषाकृतरसिकमनःपरितोषाः ।
मधुरसगन्धमिलन्मधुकृद्ध्वनि-
मुखरमभूत् सुमवर्षं दिवि रचितमहत्तरवर्षम् ॥ २९ ॥

अपि च जगुः सुरगायकवर्गाः
सह युवतीभिरुदारं श्रुतिकुहरहरस्वरसारम् ।
विबभुरतीव वितानहुताशा
विततपरिभ्रमलीलाकृतविपुलजगत्यनुकूलाः ॥ ३० ॥

व्यनददसौ सुरसुन्दरिवर्गः
श्रवणमुदं नृषु तन्वन् नवघननिनदं परिघून्वन् ।
जलमखिलं घटयोन्युदयोष्विव
सुविमलमास रसाढ्यं धुतकमलपरिमलमीड्यम् ॥ ३१ ॥

गगनतलं सकलञ्च पयोधर-
विकलमभूदसिनीलं निशि विमलतरोडुविशालम् ।
जगति न कश्चिदभूदफलाढ्यः
प्रसवसमृद्धिविहीनः स्वयमवनिरुहो धृतमौनः ॥ ३२ ॥

अथ च :—

विधिप्रसादाद्विहितावतारं
स्वतोऽधिकश्रीगुणभूतिभूमिम् ।
सुमेरुरुद्वीक्ष्य सुतं ममज्ज
द्राक् सङ्गमे विस्मयमोदसिन्ध्वोः ॥ ३३ ॥

सूतमित्थं द्विजाः प्राहुः कथयन्तं कथान्तरे ।
मेरूदरसमुद्भूतिभाग्यं भाद्रं बुभुत्सवः ॥ ३४ ॥

भूमपरसीमपदहेमगिरिरामा-
गर्भजनिहेतुमिह दुर्भगदुरापम् ।
सूत वद मा तव दयामृदु मनोऽभूत्
भद्रसुकृतं प्रकृतभद्रगिरिमौलेः ॥ ३५ ॥

सूतमुनिरेवमृषिभिः स परिपृष्टो
हृष्टहृदयः प्रणिजगाद पुनरेवम् ।
मेरुवनिताजठरगर्भजनियोनिं
भद्रशिखरीश्वरकृतं सुकृतसारम् ॥ ३६ ॥

पद्मबन्धुवंशमौलिमण्डनीभवन् महान्
पुण्डरीकलोचनोऽरिखण्डनैकपण्डितः ।
दण्डकेषु सञ्चरन् गुरूपदेशगौरवात्
सीतया च लक्ष्मणेन सौहृदादनुद्रुतः ॥ ३७ ॥

स कश्चिदद्भुतोपलं पयोदनीलशीतलं
चिराय मार्गजश्रमं शमं निनाय यं श्रितः ।
ददाविमं प्रति प्रभुर्वरं भवान् भवान्तरे
सुमेरुसम्भवो भवेत् भृशं मदार्तिभञ्जनात् ॥ ३८ ॥

धराधरोत्तमोऽग्रिमो मदङ्घ्रिभावशालिनां
गुणैरुदारशोभनैश्शुभाचलाह्वयोऽस्त्विति ।
अतोऽद्रिसार्वभौमतो व्रतोपवासकर्शिता-
दभूच्छुभाचलाह्वयस्सुतो गिरिश्रियादसौ ॥ ३९ ॥

श्रियायुतार्कसन्निभो धिया बृहस्पतेस्समो
दयारसैकजीवितो वि[भा]नधीः क्षमाकरः ।
प्रमादिदोषवर्जितः शमादिसद्गुणार्णवो
यशोभिरुज्वलैः स्वतो दिशो दशाप्यशोभयत ॥ ४० ॥

ततश्च :—

स्मरन्वरं पुरातनं स राघवप्रसादत-
श्चचार दुश्चरं तपः स्वयं तदङ्घ्रिमुद्दिशन् ।
हिमे हिमाम्बुमध्यगो विनाश्रयं घना [1]घने-
तपातपेऽग्निमध्यभागनुच्छ्वसन्नहर्निशम् ॥ ४१ ॥

क्षिपन्नधः शिरः पदावुपर्युदञ्चयन्नहो
निधाय कर्मसाक्षिणि स्वचक्षुराशवर्जितः(?) ।
तपस्यतोऽस्य शीर्षतो निरुध्य वायुमुत्थित-
स्तताप सर्वतो जगत्तपोऽनलस्तदोद्धतः ॥ ४२ ॥

ततोऽग्निना भृशार्दितैः पितामहादिभिः प्रभु-
र्वराय तस्य याचितस्तथेत्युदीर्य तान् प्रति ।
स रामवेषभूषितः सुपर्णमास्थितः श्रिया
सविद्युदम्बुदो यथा सुमेरुमेत्य तत्क्षणात् ॥ ४३ ॥

ज्वलन्मणिश्रिया स्फुरत्किरीट [रत्न]कुण्डलो
महार्घहारनूपुरो मनोहराङ्गदद्युतिः ।
रुचा विचित्रमेखलस्सुचारुरत्नकङ्कणो
महेन्द्रनीलमञ्जिमद्विषा तनुत्विषोज्वलः ॥ ४४ ॥

कराम्बुजोदरस्फुरच्छरासबाणनिर्गल-
न्निरर्गलप्रभाझरीविभातदिङ्नभोऽङ्गणः ।
प्रतप्तकाञ्चनद्युता पदाम्बुजान्तलम्बिना
नवेन पीतवाससा लघीयसा परिष्कृतः ॥ ४५ ॥

तटिच्छटावतारया नतापताकृता . . .
स्फुटारविन्दहस्तया श्रितो विदेहकन्यया ।
कनत्सुवर्णवाससा तटित्सुवर्णवर्ष्मणा
सदा विनम्रमौलिना मुदाञ्जलिं वितन्वता ॥ ४६ ॥

---

[1] गमे ।

उदग्रवीर्यशौर्यधैर्यमुख्यसद्गुणान्विना
भुजोऽस्य दक्षिणोऽयमित्युदीरितेन साधुभिः ।
शरासिचापधारिणा समग्रभूषणश्रिया
निराकृतार्करोचिषा निषेवितोऽनुजन्मना ॥ ४७ ॥.

तदा बभूव भूभृतो मुदामुदारधीर्हरि-
र्निदानमक्षिगोचरः सदातपे तपस्यतः ।
यथेन्दुपादजीविनस्स्फुरच्छशाङ्कमण्डलं
यथा च नीरदो नवः प्रतप्तचातकावलेः ॥ ४८ ॥

तं वीक्ष्य दिव्यपुरुषं तटिदुज्वलाङ्ग्या
दिव्योपगूढमतसीकुसुमावभासम् ।
तापत्रयप्रशमनस्मितलाञ्छितोष्ठं
तुष्टाव भूधरमणिः प्रणिपत्य तुष्टः ॥ ४९ ॥

ग. नितान्तगर्वोद्धताशरपतिप्रतायमानप्रतापगर्वप्रतापितामरकृतानघस्तुति-
शतापतत्सुविततानुकम्पाकृतार्कवंशावतारि गाधिजवितान-
हेतोर्हताशरावानिसुताविवाहार्दिताग्र्यचाप स्वतातवाक्याद्गताट-
वीपथगतातिदुर्जनहृतावुदाश्वितमताब्धिबन्धनकृतावुदास्थोद्धृता-
खिलारे वि[चि]तात्मपत्तन सुताजसूनोः नतार्तिकृन्तन[1]वृणोमि
ते चरणं क्षणमिह भजतामभीष्टदं शरणम् (?) ॥ ५० ॥

द्विपाभयप्रद सुपावनात्मापारवैभव कृपारसाब्धेऽनपायसाहसविपाठवृष्टि-
प्रपातनश्यत्क्षपाचरतते जपारुणाम्बर विपापवश्य प्रपायिताम-
यतपार्दितानां द्युपादप, स्वयमुपान्तभाजां नृपालिसंश्रित
सुपादपद्म व्यपास्तहेय स्वपार्श्वदीव्यत्सुपाटलाधरनृपात्मजाक्षि
प्रपातसन्ततिसुपात्रितात्मन् उपास्य सर्वैरुपायभूत स्वपादुकाभ्येर्नमो
नमस्तेऽस्तु न भवति सुलभं भवत्समं वस्तु (?) ॥ ५१ ॥

1 वृणे भवच्छरणम् ।

जितं ते हरे शेष शेषाश शेषिन् (!)
  जितं ते पुरारातिमुख्यार्चिताङ्घ्रे ।
जितं ते विभो जङ्गमस्थावरात्मन्
  जितं ते जितं सर्वकामामिराध्य ॥ ५२ ॥

जितं ते रमालोचनेन्दीवरेन्दो
  जितं ते जगत्सर्गरक्षान्तकारिन् ।
जितं ते मुकुन्दारविन्दाक्ष शौरे
  जितं ते चिदानन्दसन्दोहमूर्ते ॥ ५३ ॥

इदानीं प्रभो सुप्रभाता निशेयं
  ग्रहास्सर्वे एवाद्य सुस्थानभाजः ।
इदानीमभूद्भूरि पुण्यं विपक्वं
  यदास्ते ममाक्ष्णोः पदं त्वत्पदं नः ॥ ५४ ॥

धर्षति हर्षोत्कर्षं वरयति चेतो ममाद्य तव वीक्षा ।
दमयति हन्ति धुनीते दरमपि तापं क्रमेण पापं च ॥ ५५ ॥

पदाब्जरेणुरूषणान्निमज्य नाभिपल्वले
  विषज्य वक्षसि श्रियानुमोदितस्तदोकसा ।
[1]विलीयते मुखांबुजे समेत्य वासनां सतां
  मनो ममाद्य ते विभो किरीटधाम्नि नृत्यति ॥ ५६ ॥

पादौ पयोजमुषमादौ कृपार्थिजनमोदौ भजे रघुपते
  दोषाविमावपि च दोषाकरोन्नतिहृदेषोऽहमास्यमपि ते ।
वक्षो विशालमिदमिक्ष्वाकुनाथ तव लक्ष्मीवदाक्षि च विभो
  लीलाविलोकहतहालाहलोग्रभवहेलाकमब्जसुषुमम् ॥ ५७ ॥

भ्रान्तिर्मम स्वप्नोऽथवा भक्तेरथ व्यक्त्यन्तरे
  यद्वा स्पृहा स्रोतः स्वयं चिन्तापरीणामोऽथवा ।
नेयं भवत्साक्षात्कृतिः क्वाहं मितानन्दोऽल्पधीः
  क्वेदं तव प्रेक्षासुखं वेधोमुखैरप्यर्थितम् ॥ ५८ ॥

---

[1] विलीय वक्त्रपङ्कजे ।

चलति समीरणो यदयमूर्ध्वमधश्च सदा
लयमुदयं ग्रहा निशि दिवापि च यद्दधते ।
यदपि विकारितामनिशमृच्छति भावगणो
भवति तवेच्छयैव तदशेषमिति ब्रुवते ॥ ५९ ॥

आलिङ्गान्यहमङ्गं चुम्बानि पदं विजिघ्राणि ।
यद्वा नृत्यानि विभो गायानि पुरो मुहुर्नमस्यानि ॥ ६० ॥

यस्य द्यौः शिरसो रविर्नयनतो काष्ठा दश श्रोत्रतः
सप्तार्चिर्मुखतो विधुर्हृदयतो वातः पुरा प्राणतः ।
नाभीतः खमपि क्षितिश्चरणतः प्रादुर्बभूव प्रभो-
स्तस्मै सर्ववपुषे समस्तवपुषे कस्मैचिदस्मै नमः ॥ ६१ ॥

चरणसरसिजं ते सिन्धुकन्याधिनेतः
शरणवरणभाजां शाश्वतानन्दहेतुम् ।
जननमृतिजराधिव्याधितृष्णाक्षुधादि-
व्यसनहरणहेतोर्वीतरागः प्रपद्ये ॥ ६२ ॥

स्तुत्वेत्थं पुरतः प्रणम्रशिरसं भद्राचलेन्द्रं हरिः
पश्चार्धे [1]परिमृज्य वत्स तपसा तुष्टोऽस्म्यभीष्टं वृणु ।
इत्यूचे निजमूर्ध्नि तस्य वसतिं दारानुजाद्यैस्सदा
वव्रेऽसावपि तत्तथेति मुरजिद् वरतुं स तत्रैहत ॥ ६३ ॥

तत्क्षणञ्च :—

विप्रोत्तंसवराग्रहारसुभगं वापीशताप्यायितं
वीथीविस्तृतचित्रसौधमभितो वादित्रसन्नादितम् ।
वारस्त्रैणविहारवेश्मनिबिडं विस्तीर्णपण्यापणं
नानादिग्जनसङ्कुलं पुरमभूत्तत्रेच्छया श्रीपतेः ॥ ६४ ॥

---

1 परिमृश्य ।

तथाहि :—

यदुरुवरणगोपुराग्रजाग्रत्
स्वकरहतस्वाशिलोद्यदग्नितप्तः ।
प्रतिनिवसति देहदाहशान्त्यै
प्रतिनिशमम्बुनिधौ किमेष पूषा ॥ ६१ ॥

अनुनिशमपतन्द्रचन्द्रदृष्यत्-
तदुपलनिर्मिततच्छिरोग्रहोत्थैः ।
सलिलमुदयैस्समुल्लसन्तं
निधिमशकत्तमपां न पातुमौर्वः ॥ ६६ ॥

जगति वितमसि प्रभूतदृव्यित्
सितमणिक्लृप्तदीयसौधशृङ्गैः ।
दिवसकृदुदयोऽभवन्नाराणा-
मवगमनैकफलो दिवारजन्योः ॥ ६७ ॥

यदुपवनमहीरुहाः स्मरन्तः
सलिलमुचां जलदानमादरेण ।
वियति विहरतां तटिद्वधूभिः
विदधति तल्पमनल्पमुत्प्रवालैः ॥ ६८ ॥

क्वचिन्मणिगणोल्बणः क्वचिददभ्रमुक्ताफलः
क्वचिज्जलजसङ्कुलः क्वचन शुक्तिनीरन्ध्रितः ।
यदीयविपणीगणः क्वचन सन्ततो विद्रुमैः
निपीतसलिलोऽर्णवः कलशजन्मनेवाबभौ ॥ ६९ ॥

तन्मध्ये च :—

अत्यर्केन्दुमयूखदीधितिमणिप्राकारपूशावृतं
स्फायत्स्फाटिकरक्तगोपुरशिरश्शोभाविभाताम्बरम् ।
दीव्यन्मण्डपरक्तादिव्यसुषुमादेदीप्यमानोदरं
जातं तत्क्षणमेव धाम विपुलं दीप्तं विमानश्रिया ॥ ७० ॥

ततश्च :—

तस्मिन्मनोहरपुरे मधुरे निकेते
माणिक्यभासिनि विमानतले महार्घे ।
भद्रासने स्थितिमगान्मिषतस्स तेषु
भास्वानिवोदयगिरौ भगवान्नमेशः ॥ ७१ ॥

[1] साकेतस्मयघस्मरेऽत्र नगरे सद्यो मणीमन्दिरे
सौवर्णोरुविमानराजजठरे सुस्थः सुवर्णासने ।
सीतालक्ष्मणकैकयीजरिपुजिद्वातात्मजार्कात्मभू-
रक्षोनाथसमुल्लसत्परिसरो रेजे रघूणां प्रभुः ॥ ७२ ॥

तदानीं तु :—

सहृदयलोकमनःपरितोषः
समजनि भद्रगिरीन्द्रे स्थितिमुपयाति राघवचन्द्रे ।
वलति मृदु स्म तदा पवमानः
सुरभिसुशीतशरीरः कृतजगदगदः शुभाचारः ॥ ७३ ॥

ननृतुरप्सरसस्समवेता-
श्चरणरणन्मणिभूषाः कृतरासिकमनःपरितोषाः ।
अपि च जगुस्सुरगायकवर्गाः
सह युवतीभिरुदारं श्रुतिकुहरहरस्वरसारम् ॥ ७४ ॥

मधुरसगन्धमिलन्मधुकृद्ध्वनि-
मुरवरमभूत् सुमवर्षं दिवि रचितमहत्तरहर्षम् ।
व्यनददसौ सुरसुन्दरिवर्गः
श्रवणमुदं नृषु तन्वन् नवघननिनदं परिधून्वन् ॥ ७५ ॥

---

[1] मातृकान्तरे अयं श्लोकः कोष्ठान्तर्गमितः ।

विबभुरतीव वितानहुताशा
वितततर्परिभ्रमलीलाकृतविपुलजगत्यनुकूलाः ।
जलमखिलं घटयोन्युदयेष्विव
सुविमलमास रसाढ्यं धुतकमलपरिमलमीब्यम् ॥ ७६ ॥

गगनतलं सकलञ्च पयोधर
विकलमभूदसिनीलं निशि विमलतरोडुविशालम् ।
जगति न कश्चिदभूदफलाढ्यः
प्रसवसमृद्धिविहीनः स्वयमवनिरुहो धृतमौनः ॥ ७७ ॥

ततश्च—

देव्यालङ्कृतमञ्चितं सहभुवा शत्रुद्रुहा वीजितं
हस्तोदञ्चितचामरेण भरतोदस्तातपत्रोत्तमम् ।
अङ्घ्रयानम्रसमीरजं सुमहितं रक्षःकपीन्द्रादिभिः
श्रीमन्तं [1] समवेक्ष्य तत्र मुमुदे रामं तमद्रीश्वरः ॥ ७८ ॥

किं च :—

सीतालक्ष्मणकैकयीजरिपुजिद्वातात्मजाकात्मभू-
रक्षोनाथसमुल्लसत्परिसरं कामोपमं कामपि ।
बिभ्राणं श्रियमत्युदात्तवपुषं रामं विरामं द्विषां
दर्शंदर्शमसौ ततर्प न भृशं राजा गिरीणां गिरिः ॥ ७९ ॥

अनन्तरञ्च :—

सुजनसार्थहृत्पद्मवासिता-
समयसम्मिलत्सत्वसंशयम् ।
हृदि विलोकिनां सन्दुहानया
नखमाणिश्रिया निर्जितोडुपम् ॥ ८० ॥

---

[1] स्वशिरस्युदीतमनघं पश्यन्नानन्दाद्रिराट् ।

त्रिदिवानिम्नगातस्प्रियाम्बरे
यत उदाश्विते यत्र विन्दतः ।
मधुपरागतां ते यथाक्रमं
पदपयोरुहा तेन भासुरम् ॥ ८१ ॥

पदनलच्छलात्प्रेक्ष्यतेऽन्तिके
स्मरशरो यतस्तत्स्मरेषुधी ।
इति कवीश्वरोत्प्रेक्षितात्मना
जनितहृन्मुदं जङ्घया नृणाम् ॥ ८२ ॥

करिकरद्रुहा कान्तिनिर्भृता
नवहरिन्मणिस्तम्भशोभिना ।
स्फुटतटिच्छटाबन्धुराम्बरो-
द्वहनचारुणा धीरमूरुणा ॥ ८३ ॥

निगमविश्रुतालोकमातृना
धृतवता जगद्येन सूनृना ॥
अपि च तत्पितुः स्वात्मनोऽभवत्
दधतमुज्वलं तत्तनूदरम् ॥ ८४ ॥

उचितकारितां व्यङ्क्तुमात्मगां
तनुतरोदरे तादृगम्बरम् ।
दधतमुत्प्रभे नित्यमुत्प्रभं
सतटिदम्बुदाडम्बरद्रुहम ॥ ८५ ॥

दिनकरश्रिया दत्तसौभगं
द्वयमुदश्चितं पुष्करं यतः ।
जगति विश्रुतागाधतास्पदं
दधतमुज्वलं नाभिपल्वलम् ॥ ८६ ॥

प्रविलसद्गुणां पद्मरागिणीं
  विधुसहोदरीं वृत्तभासुराम् ।
सततशीतलां स्वामिव प्रिया-
  मुरसि बिभ्रतं मौक्तिकस्रजम् ॥ ८७ ॥

ग्रसति यन्निजग्रासरोषितो
  द्युमणिमण्डलं बाहुपन्नगः ।
तदिदमङ्गदाकारगूहितं
  स्वधरणोत्थया बिभ्रतं मुदा ॥ ८८ ॥

अनघकुण्डलं न्युप्तगोत्रभिन्-
  मणिमरीचिकापूरमण्डितम् ।
तरुणशैवलव्रातसंवृत-
  स्फुटसरोजजिद् बिभ्रतं मुखम् ॥ ८९ ॥

दृशि पयोजताभ्रान्तितोऽलिनां
  पततु मा ततिर्नाभिपद्मगा ।
इति धियाहितं चम्पकं क्रिमि-
  त्यनिशमूहचया नासयाश्रितम् ॥ ९० ॥

वहति माधवो मामिति स्मयं
  दधति मन्दरे मत्सरादिव ।
स्थितवतानिशं मूर्ध्नि मेरुणा
  मकुटभानुना जित्वरं रवेः ॥ ९१ ॥

धनुरदक्षिणे दक्षिणे शरं
  कनकचित्रितं कान्तपुंखकम् ।
प्रदधतं करे तूणमंसके
  कटितटे शितां खड्गवल्लिकाम् ॥ ९२ ॥

मृदुपदाब्जया मुग्धजङ्घया
मुकुरदर्पहृज्जानु[1]जङ्घया ।
उरुतरोरुभाधूतरम्भया
गुरुनितम्बया गुप्तमध्यया ॥ ९३ ॥

पृथुकुचद्वयीभारनम्रया
ललितहारया रम्यबाहुया ।
कमलनेत्रया कान्तकुण्डल-
स्फुरितगण्डया कम्बुकण्ठया ॥ ९४ ॥

दरनतभ्रुवा दृश्यनासया
कुटिलकुन्तलालङ्कृतास्यया ।
धुततटिच्त्विषा दीप्रवाससा
धरणिकन्यया सम्यगीक्षितम् ॥ ९५ ॥

सधनुषा लसद्बाणपाणिना
विनतमौलिना विद्युदोजसा ।
अरुणपङ्कजातङ्ककृद्दृशा
सहभुवानिशं सेवितान्तिकम् ॥ ९६ ॥

भरतशत्रुजिद्भ्रानुजाञ्जना-
[2]सुतविभीषणाद्याप्तसंवृतम् ।
मणिमये स्थितं मङ्गलासने
मधुरविग्रहं मुग्धलोचनम् ॥ ९७ ॥

हृदि लगत्कृपं हृष्टचेतसौ
रघुपुरन्दरं सुन्दरस्मितम् ।
अनिशमागतास्सर्वतो नराः
सह सुरासुरास्तं ववन्दिरे ॥ ९८ ॥

---

1 बिम्बया । 2 अव ।

कमलासनविमलाननिलयश्रुतिहरणं
मुरमर्दन बलसूदनमुखदुश्शोकनिधनम् ।
विपुलार्णवसलिलान्तरभुवि कल्पितशयनं
हतवानसि मधुमुद्धतमिह मत्स्यवपुस्त्वम् ॥ ९९ ॥

सुरदानववरदोर्बलसुदृढभ्रमितं त्वं
कलशार्णवहृदि दुर्भरगुरुभारनिमग्नम् ।
पृथुमन्दरधरमीश्वर सुरजीवनहेतोः
कमठाकृतिधर माधव धृतवानपराङ्गे ॥ १०० ।

प्रलयार्णवभुवनोदरतलदूरनिलीना-
मबलां[1] विपुलां स्वामतितरसोर्ध्वमुदस्य ।
फणिराजफणामण्डलमधिरोपितवांस्त्वं
दयया दनुजद्वेषणधृतकोलशरीरः ॥ १०१ ॥

प्रणतासुरपृथुकापदमसुरावलिडंभं
रिपुगेहगतस्तम्भकमपि वैरिमहोभ्रम् ।
युगपत्किल भेत्तुं धृतनरसिंहशरीरो
जगतामुपकृतवानसि नितरामभयेन ॥ १०२ ॥

मितयाचनभृशलज्जितबलिमानसवृत्ते
स्वपदस्रुतसलिलाप्लुतिमुदिताखिललोक ।
परिवर्धितधुतसज्जनसुखदुःख विभो त्वं
भवुकाय भवध्वंसन भव वामनमूर्ते ॥ १०३ ॥

परशुक्षतमदमेदुरबहुबाहुजकण्ठ-
क्षरदास्रसरःकल्पितपितृतर्पण देव ।
सकलाध्वरविधियाजिनि सकलावनिदायिन्
कुरु वारिधिकृतमन्दिर करुणां भृगुराम ॥ १०४ ॥

---

1 प्रबला ।

कमलोद्भवभववासवमुखदैवतयाच्ञा-
कृतवारिजसुहृदन्वयभवनाश्रितशरण ।
दृढसेतुनिबद्धार्णवहतदृप्तदशास्य-
प्रमुखाशरनिकर क्षितितनयेश नमस्ते ॥ १०५ ॥

अतिमञ्जुलमृदुवीक्षणविवशीकृतललना-
वलयान्तरनवहीरकमणिमोहदधामन् ।
हतधेनुकदृढमुष्टिकमुखदुर्जन हाला-
मदकृष्टकलिन्दात्मज बलदेव नमस्ते ॥ १०६ ॥

शकटार्दिद बकभञ्जन बलशासनशासिन्
जितहंस गलत्पौण्ड्रक हतकंस मुरारे ।
कृतबाणभुजच्छेदन हतभूसुतदृप्ते
वसुदेवतनूसम्भव भव नश्शरणं त्वम् ॥ १०७ ॥

यवनैर्भुवनं व्याकुलमपनीतिविलासै-
रवलोक्य दयालुर्हृदि कृतकल्क्यवतारः ।
वितनिष्यसि जलदासितनिशितासिहतारिः
कृतधर्मसमृद्धिं भुवि धुतदुष्कलिशमलः ॥ १०८ ॥

हतकैटभ धृतमन्दर धरणीधरमूर्ते
नरकेसरिवर वामन भृगुनन्दन राम ।
बलभद्र बकध्वंसन कलिकल्मषहारिन्
कुरु सन्ततमुरुविक्रम शुभसन्ततिमीश ॥ १०९ ॥

इति मुहुर्मुहुर्देवमञ्जसा मुखरदिङ्मुखाः सम्यगैडयन् ।
रघुपुरन्दरात्प्राप्य वाञ्छितं स्वगृहानिरष्टहास्तत्र रेमिरे ॥ ११० ॥

॥ इति पूर्वो भागः ॥

॥ अथ उत्तरो भागः ॥

इत्यद्रिसारमाहात्म्यं यथामत्युदितं मया ।
तच्छेषभूतमपरं कथान्तरमुदीर्यते ॥ १ ॥

गोदावरीरोधसि शेषकुण्डं
शेषेश्वरं सेधसि तत्समीपे ।
स्थलद्वयं भाति शुभाद्रिमूले
ब्रवीमि तस्योद्भवमस्य शेषम् ॥ २ ॥

उपाद्रवन् पुण्यजनाः कदाचित्
रसातलं केचन नागगुप्तम् ।
अपारयन् क्षेप्तुमिमानपारान्
समीपमापाशु विधेस्स शेषः ॥ ३ ॥

जगाद चैनम् :—

विधे विधेयं किल वेत्सि सर्वं
वधे वधोपायमिहाशराणाम् ।
विधीयते यैरवशिष्टसंज्ञं
रसागतं संप्रति भूतजातम् ॥ ४ ॥

इत्यूचिवांसं भुजगेशमूचे
विधिर्विधिज्ञो विहितार्थसर्गः ।
क्षणं विचिन्त्य क्षणदाचराणां
वधेऽभ्युपायं वदतां वरिष्ठः ॥ ५ ॥

गोदावरीरोधसि कश्चिदिन्धे
भद्राचलो नाम नगाधिराजः ।
यमाद्रिराजस्य सुतं सुमेरोः
प्राहुः परं धाम परस्य धाम्नः ॥ ६ ॥

इदञ्च :—

क्षेत्रवैभवमुत्तमं हृदि कुर्वतां परिपश्यतां
शृण्वतां पठतां भवत्यपि सर्वपातकसंक्षयः ।
अत्र च त्रिदिनं सतामपि पूर्वजन्मशतार्जितः
सद्य एव विनश्यति स्थिरभूरिपापफलोदयः ॥ १३ ॥

स्नानदानजपादिकं कृतमत्र किञ्चिदपि स्वयं
भूरिभूरिफलप्रदं द्रुतमिच्छया भवति प्रभोः ।
यद्यदिच्छति वै जनः पशुपुत्रवित्तमुखं फलं
तद्ददाति सकृत्कृतः खलु तत्र पुण्यजलाप्लवः ॥ १४ ॥

यस्तु नावमिके तिथौ व्यतिषज्य पुष्करिणीजले
भक्तिपूर्वकमर्चति स्वयमाहृतैस्तुलसीदलैः ।
राघवं दयितासखं शुभलक्षणं क्षणमप्यहो
तस्य हस्तगता भवत्यपि मुक्तिसम्पदनुत्तमा ॥ १५ ॥

नारदः स्वगुरोर्मुखादिदमद्भुतं सह योगिभिः
सन्निशम्य चिरं वसन्निह राघवाङ्घ्रिसमर्चकः ।
भूरिपुण्यजालाप्लुतः स्वकमाप्य सर्वमनोरथं
द्रागजगाम पुनस्त्रिविष्टपधाम पूर्वमिति श्रुतिः ॥ १६ ॥

अश्नुते बधिरान्धपङ्गुविहस्तमूकमुखः सुखा-
दत्र सन्निधिमात्रतो बत तत्तदिन्द्रियसम्पदम् ।
बन्ध्ययोषिदपि स्वतः शिशुभारमन्थरचङ्क्रमा
मन्दमन्दमिहाधिरोहति मन्दरोरुशुभाचलम् ॥ १७ ॥

देवदानवयक्षराक्षससिद्धकिन्नरसत्तमाः
स्वस्वलोकगतस्पृहा इह राघवाङ्घ्रिमुपासते ।
अर्चयन्ति विभुं सुदुर्लभगन्धपुष्पफलादिभिः
तत्तदीप्सितमाप्नुवन्ति च तत्क्षणेन रघूद्वहात् ॥ १८ ॥

यच्च तीर्थमनुत्तमं भुवि यद्रसातलगर्भगं
यच्च वा त्रिदिवे भवेत् परमुच्चपातकनाशनम् ।
तत्समस्तमिहाज्ञया रघुपुङ्गवस्य जगत्प्रभो-
र्नित्यमेत्य निवासमश्नति हृद्यपुष्करिणीमुखे ॥ १९ ॥

यस्तु रामनवम्युपोषणमेत्य पारणमाचरन्
तर्पयेद्द्विजमेकमप्युत तत्र दैन्यनिकृतेनम् ।
काश्यभिख्यमहास्थले बुधवृन्दकोटचभितर्पणे
यत्फलं विपुलं ततोऽप्ययमेति कोटिगुणं बुधाः ॥ २० ॥

कृत्स्नमप्यवनीतलं यदि पत्रभावमुपाश्नुते
सप्तसागरसञ्चयः स्वयमेत्य यच्च मषी भवेत् ।
वक्तृतामुपयात्यसावपि चेत् सहस्रमुखः [फणी] (पुमान्)
वैभवं लिखितं भवेदपि कृत्स्नशोऽस्य तदा बुधाः ॥ २१ ॥

इत्थमुत्थितमद्भुतं मधु सूतवक्त्रसरोरुहात्
भद्रशैलकथासुधारसमुद्रमातुरभेषजम् ।
शौनकप्रमुखाः सुखं परिभुज्य पूर्णमनोरथाः
तं भृशं प्रशशंसुरुन्मुदमादरेण बुधालयः ॥ २२ ॥

उल्लसत्पदबद्धमञ्जिमवञ्चिताम्बुजमालिकं
दुग्धसिन्धुतरङ्गभङ्गददीव्यदर्थगुणं शुभम् ।
[1]सुन्दरेण विनिर्मितं रघुनन्दनाङ्घ्रिसुधाभुजा
भद्रचम्पविधं गुणोज्वलमस्तु वस्तु सतां मुदे ॥ २३ ॥

क्षीरसागराङ्कभूषिशेषभोगशायिने
वामदेवमुख्यदेववर्णितात्मकीर्तये ।
लोकशोकमोचनार्थमित्रवंशजन्मने
कोसलेन्द्रजोच्चभाग्यराशयेऽस्तु मङ्गलम् ॥ २४ ॥

---

1 राघवेण ।

अस्त्वजाब्धिपारिजातदक्सरोजभानवे
गाधिजाध्वराध्वरोधियातयूथयोधिने ।
गौतमाङ्गनाङ्घ्रिशैलभञ्जदाङ्घ्रिरेणवे
चण्डिकेशचापदण्डखण्डनाय मङ्गलम् ॥ २५ ॥

भूमिकन्यकाकटाक्षभूमवीक्षितश्रिये
भार्गवाग्रहप्रहाणकारणोग्रतेजसे ।
पौरहृच्चकोरचन्द्रसान्द्रसद्गुणाब्धये
मातृचोदितस्वतातवाक्स्थिताय मङ्गलम् ॥ २६ ॥

तत्क्षणप्रविष्टसत्त्वजुष्टकाननाय ते
स्वाङ्घ्रिलग्नहृद्गुहाप्रविष्टसौहृदर्द्धये ।
स्वप्रियानुजादृताय चित्रकूटवासिने
पादुकाप्रदानतोषितानुजाय मङ्गलम् ॥ २७ ॥

सद्विरोधकृद्विराधधूतिधूर्वहेषवे
तीक्ष्णसत्तपस्सुतीक्ष्णमुख्यसत्कृतात्मने ।
कुम्भसम्भवात्तचापखड्गतूणधारिणे
तत्क्षणप्रतिश्रुतारिनिग्रहाय मङ्गलम् ॥ २८ ॥

पञ्चवट्युदग्रवासविस्मृतात्मनिर्वृते
कृत्तरावणानुजोच्चनासिकानुजन्मने ।
रुष्टहृत्खराद्यखर्वदुष्टगर्वचार्विणे
पाटितोग्रताटकेयनाटकाय मङ्गलम् ॥ २९ ॥

स्वप्रियावनप्रणष्टवृद्धगृध्ररक्षिणे
लुप्तदृप्तहृत्कबन्धमन्दरोरुबाहवे ।
उग्रभक्तिमच्छबर्युदग्रसत्क्रियाजुषे
वानरेन्द्रसख्यलाभनिर्वृताय मङ्गलम् ॥ ३० ॥

वालिनिग्रहप्रमृष्टशोकमित्रचेतसे
तद्विसृष्टवायुजोक्तमैथिलीप्रवृत्तये ।
सैन्यसंवसंवृताय सागरान्तमेयुषे
शिष्टरावणानुजेष्टराज्यदाय मङ्गलम् ॥ ३१ ॥

पावकास्त्रपातप्रवृत्तभीतिकाब्धये
सेतुबन्धतीर्णदूरसिन्धुसैन्यसिन्धवे ।
तत्तदाशरप्रमारसक्तवानरालये
राक्षसेशसूनुसूदिसोदराय मङ्गलम् ॥ ३२ ॥

पुत्रपौत्रनप्तृमित्रबन्धुभृत्यमध्यग-
स्फारशौर्ययातुधुर्यदुष्करान्तकारिणे ।
स्वप्रवेशभ्रातृमातृमन्त्रिगुर्वनुज्ञया
रत्नचित्रासिंहपीठमध्यगाय सीतया ॥ ३३ ॥

मारुतिप्रधानमुख्यवानरेन्द्रसम्भृतैः
पुण्यतीर्थवारिभिस्तदाभिषिक्तमूर्तये ।
पावितानलप्रियाप्तिशोभिने महात्मने
पुष्पकापवाहिताध्वविस्तराय मङ्गलम् ॥ ३४ ॥

छत्रचामरध्वजप्रभूपचारशोभिने
वानराशरेन्द्रदत्तहारभूषणस्रजे ।
पालिताखिलक्ष्माय वारितामरद्विषे
राञ्जितप्रियाहृदेऽस्तु राघवाय मङ्गलम् ॥ ३५ ॥

इत्थं राघवसूरी रघुवरगुणरत्नवर्णनपवित्राम् ।
चित्रां शुभाद्रिचम्पूं व्यरचयदरुणाब्जलोचनप्रीत्यै ॥ ३६ ॥

अपदिश्य सुन्दरविभोरादेशं राघवार्यदासेन ।
भद्रगिरिचम्पुरित्थं रचिता रघुनायकप्रसादाय ॥ ३७ ॥

॥ इति श्रीराघवसूरिप्रणीतेयं भद्राचलचम्पूः समाप्ता ॥

॥ श्रीरामः शरणम् ॥

CIDAMBARA VILĀSAM

Edited by

PULAVAR M. PASUPATHI.

Chidambara Vilāsam is a very old paper manuscript in elegant poetic form preserved in this Library. The number of the manuscript is R. 365. This book explains in detail the Āgamas of the Chidambaram Temple. The author has taken great pains in describing the image of Sri Naṭarāja, the ruling divinity of Chidambaram and illustrations are quoted from Śiva Purāṇas. It is written in such a simple style that everybody can understand the greatness of the Śaiva cult. The manuscript also deals with other temples situated at Chidambarm and the topography of this historic city is beautifully described. Neither the name of that author nor that of the scribe or the date of transcription of the manuscript is mentioned.

சிதம்பர விலாசம்.

சிதம்பர விலாசம் என்ற இந்நூல் தில்லைமூதூர் என்ற சிதம்பரத்தில் எழுந்தருளாநின்ற ஆலமர் செல்வனாகிய ஸ்ரீ நடராஜக் கடவுளின் அருள் தத்துவத்தை, ஒருவன் எள் பொழுதாயினும் உளம் பொருந்த நினைத்து, அன்பு கொண்டு வாழ்த்தி, செவி நிறையக் கேட்பானாயின் பிறவியாகிய பெருங்கடலை எளிதில் கடந்து, நிலைபேறான வீட்டின்பத்தை யடைந்துய்வது திண்ணம் என்ற திரண்ட கருத்தினைப் பகர்வதாக அமைந்து, ஆடவல்லானின் அருள் வடிவத்தின் உட்பொருள்களையும், அவன் அண்மையிலமைந்திலங்கும் மற்ற தெய்வங்களின் குண விசேடங்களையும் நுண்ணிதாக விளக்கிச் சொல்லும் பணியில் திறம்பட யாக்கப்பட்டுள்ளது. சொற் சுவை, பொருட் சுவை அமைய, நிலை மண்டில ஆசிரியப்பாவினான் 145 அடிகளைக்கொண்டு ஆற்றொழுக்காக அமைந்தது. இயற்றியோன் இன்னாரென்று புலப்படவில்லை. இது, நூல்நிலைய மூவருடக் காட்லாக்கு R. 365–ஆம் எண்ணின் பிரதியிலிருந்து எடுக்கப்பட்டு ஒழுங்கு செய்து வெளியிடப்பட்டுள்ளது.

மு. பசுபதி.